   - (ग) हुवे विष्णुं पूषणं ब्रह्मणस्पतिम्।। ऋ० 5.46.3
   - (घ) हुवे देवानां जनिमानि सत्तः।। ऋ० 7.42.7।।
   - (ङ) हुवे नु शक्रं पुरुहूतमिन्द्रम्।। तै० 1.7.12.5

(च) आ सवंसवितुर्यथा भगस्येव भुजिंहुवे।। मै० 4.11.2

(छ) हुवे वातस्वनं कविं पर्जन्यक्रन्द्याँ सहः।। काठ० 40.14

(ज) हुवे भरं न कारिणम्।। कौ० 2.687।।

(झ) यं ते पूर्वं पिता हुवे।। कौ० 2.744 शौ० 3.8.2

(ट) हुवे सोमं सवितारं नमोभिः।। शौ० 3.8.3

(ठ) देवान्यन्नाथितो हुवे ब्रह्मचर्यं यदूषिम्।। शौ० 7.109.7

2. हुवेम।।

(क) यद्द्याश्विनावहं हुवेय वाजसातये।।

ऋ० 8.9.13; शौ० 20.141.3

3. हुवेम।।

(क) हुवेम वाजसातये।। ऋ० 6.57.1 कौ० 1.202

(ख) भोजं त्वामिन्द्र वयं हुवेम।। ऋ० 2.17.8

(ग) शुनं हुवेम मघवानमिन्द्रम्।। ऋ० 3.50.5 कौ० 1.329

(घ) प्रातः सोममुत रुद्रं हुवेम।। ऋ० 7.41.1 मा० 34.34

(ङ) देवं देवं हुवेम वाजसातये गृणन्तौ देव्या धिया।।

ऋ० 8.27.13; मा० 33.91

(च) अद्वेषे द्यावापृथिवी हुवेम।। मा० 12.29।।

(छ) अमृतस्य पत्नीभवसे हुवेम।। मा० 21.5

(ज) उग्रं सहोदमिह तंहुवेम।। का० 7.18.1

(झ) मनोजुवं वाजे अद्या हुवेम।। का० 8.19.1 तै० 4.6.2.6

(ञ) तं सरस्वन्तमवसे हुवेम।। तै० 3.1.11.3 मै० 4.10.1

(ट) यजिष्ठं त्वा यजमाना हुवेम।। काठ० 39.15

(ठ) वयमिन्द्र त्वा शुनं हुवेम।। शौ० 20.96.5

(ड) तं वां रथं वयमद्या हुवेम।। शौ० 20.143.1

4. हुवेमहि।।

(क) मरुत्वन्तं सख्याय हुवेमहि।। कौ० 1.380

'ऋचि त्रेरूत्तरपदादिलोपश्च छन्दसि' इस वार्तिक के अनुसार उपलब्ध प्रयोग-

1. तृच (त्रिचः)।।

(क) **महि त्रीणामवोऽस्त्वित्येष प्राजापत्यस्त्रिचः।।** काठ० 7.9

यहाँ पूर्वोक्त वार्तिक से '**त्रिचः**' में सम्प्रसारण नहीं हुआ। परन्तु '**ऋच्**' के '**ऋ**' का लोप होकर '**त्रिचः**' यह रूप बना है।

2. तृचम्।।

(क) **अथो यदेतं तृचमन्वाह सन्तत्यै।।** तै० 1.5.8.3

(ख) **यदेतं वृचमन्वाह यज्ञमेव तत्।।** तै० 2.5.8.2

3. तृचान्।।

(क) **त्रींस्तृचाननु ब्रूयाद्राजन्यस्य त्रयो वा अन्ये राजन्यात्।।** तै० 2.5.10.1

4. तृचेन।।

(क) **यदेतेन गायत्रेण तृचेनोपतिष्ठतः।।** मै० 1.5.10

(ख) **प्राजापत्येन तृचेनोपतिष्ठते।।** मै० 1.5.11

5. तृचेभ्यः।।

(क) **तृचेभ्यः स्वाहा।।** शौ० 19.23.19

'**रयेर्मतौ बहुलम्**' – इस वार्तिक के अनुसार प्राप्त प्रयोग–

6. रेवान्।।

(क) **यो रेवान्यो अमीवहा वसुवित्पुष्टिवर्धनः।।** ऋ० 1.18.2 मा० 3.29; का० 3.3.21; मै० 1.5.4; काठ० 7.2

(ख) **स रेवान्याति प्रथमो रथेन।।** ऋ० 2.27.12

(ग) **स मर्तो अग्ने स्वनीक रेवान्।।** ऋ० 7.1.23

(घ) **यस्ते रैवाँ अदाशुरिः प्रममर्ष मघत्तये।।** ऋ० 8.45.15

(ङ) **यस्येक्ष्वाकुरुप व्रते रेवान्मराय्येधते।।** ऋ० 10.60.4

(च) **यो अस्मै रेवान्न सुनोति सोमम्।।** ऋ० 10.160.4

(छ) **रेवांइन्द्रेवतः स्तोता स्यात् त्वावतो मघोनः।।** तै० 2.2.12.8; का० 2.18.04

(ज) **स रेवाँ इव विशपतिः।।** कौ० 2.16.65

(झ) अप्रपाणा च वेशन्ता रेवाँ अप्रतिदिश्ययः।।

शौ० 20.128.8

(ञ) सुप्रपाणा च वेशन्ता रेवाँन्त्सुप्रीतिदिश्ययः।।

शौ० 20.128.9

2. रेवता।।

(क) न रेवता पणिनां सख्यमिन्द्रः।। ऋ० 4.25.7

(ख) रेवतौषधीभ्या औषधीर्जिन्वा।। मै० 2.8.8

3. रेवद्भिः।।

(क) रेवद्भिरग्ने वितरं वि भाहि।। ऋ० 6.1.11; मै० 4.13.6

वेदसंहिताओं में 'हुवे' के तेरह, 'हुवेय' के दो, 'हुवेम' के उन्नीस, 'हुवेमहि' का एक स्थल पर सूत्रानुसार प्रयोग प्राप्त हैं। प्रथम वार्तिक के अनुसार सात तथा द्वितीय वार्तिक के अनुसार उन्नीस स्थलों पर हमें उदाहरण मिले हैं।।

134. चायः की।। अष्टा० 6.1.35

का०-बहुलं छन्दसीति वर्तते। चायतेर्धातोश्छन्दसि विषये बहुलं कीत्ययमादेशो भवति। वियन्ता न्यान्यं चिक्युर्न नि चिक्युरन्यम् (ऋ० 1.164.38)। लिट्युसि रूपम्। न भवति-अग्निर्ज्योतिर्निचाय्य (मा० सं० 11.1)।।

सि०- न्यान्यं चिक्युर्न निचिक्युरन्यम् (ऋ० 1.164.38)।। लिटि उसि रूपम्। बहुलग्रहणानुवृत्तेर्नेह-अग्निर्ज्योतिर्निचाय्य।।

पूर्व सूत्र 'बहुलं छन्दसि' (अष्टा० 6.1.34) की अनुवृत्ति आ रही है। चायृ धातु को वेदविषय में बहुल करके 'की' आदेश हो जाता है। 'निचिक्युः' यह निपूर्वक चायृ धातु के लिट्लकार के 'उस्' का रूप है। निचाय्य यहाँ बहुल कहने के कारण 'की' आदेश होता है। नहीं भी होता है- 'निचाय्य' रूप 'क्त्वा' को 'ल्यप्' आदेश होकर बना है।

वेदसंहिताओं में सूत्रानुसार निम्न प्रयोग मिले हैं-

1. नि चायृ- की निचिकेषि।।

(क) विश्वं ह्युऽग्र निचिकेषि दुग्धम्।। शौ० 1.10.2

(ख) विश्व यद् देव निचिकेषि दुग्धम्।। पै० 1.9.2

2. चिक्यतुः।।

(क) नि चिन्मिषन्ता निचिरा नि चिक्यतुः।। ऋ० 8.25.9

3. नि–चिक्युः।।

(क) न्यान्यं चिक्युर्न निचिक्युरन्यम्।।

ऋ० 1.164.38; शौ० 9.15.16; पै० 16.69.7

(ख) तासां नि चिक्युः कवयो निदानम्।। ऋ० 10.114.2

(ग) इन्द्रं नि चिक्युः कवयो मनीषा।। ऋ० 10.124.9

4. निचिकीषति।।

(क) अग्निंसधस्थे महति चक्षुषा निचिकीषति।। मै0 2.7.2

5. निचिक्यत्।।

(क) अविर्ऋजीको विदथा नि चिक्यत्।। ऋ० 4.38.4

(ख) इन्द्रेण गुप्तो विदथा नि चिक्यत्।। शौ० 5.20.12

(ग) इन्द्रेण क्लृप्तो विदथा निचिक्यत्।। पै० 9.24.12

वेदसंहिताओं में इस सूत्र के बारह प्रयोग उपलब्ध हुए हैं।।

135. अपस्पृधेथामानृचुहुश्चिच्युषेतित्याजश्राताः श्रितमाशी-राशीर्ताः।। अष्टा० 6.1.36

का०–छन्दसीति वर्तते। अपस्पृधेथामिति 'स्पर्ध संघर्षे' (भ्वा० 3) इत्यस्य लङि आथामि द्विर्वचनं रेफस्य संप्रसारणमकारालोपश्च निपातनात्। इन्द्रश्च विष्णो यदपस्पृधेथाम् (ऋ० 6.69.8)। अस्पर्धेथामिति भाषायाम्। अपर आह–स्पर्धेरपपूर्वस्य लङ्याथामि संप्रसारणकारलो- पश्च निपातनात्। 'बहुलं छन्दस्यमाङ्योगेऽपि' (अष्टा० 6.4.75) इत्याडागमाभावः। अत्र प्रत्युदाहरणमपास्पर्धेथामिति भाषायाम्। आनृचुरानृहुरिति। 'अर्च पूजायाम्' (भ्वा० 120) 'अर्ह पूजायाम्' (भ्वा० 492)? इत्यनयोर्धात्वोर्लिट्युसि संप्रसारणमकारलोपश्च निपातनात्। ततो द्विर्वचनमुदरत्वम् 'अत आदेः' (अष्टा० 7.4.70) इति दीर्घत्वम्। 'तस्मान्नुड् द्विहलः' (अष्टा० 7.4.71) इति नुडागमः। य उग्रा

अर्कमानृचुः (ऋ० 1.19.4)। न वसून्यानृहुः (शौ० सं० 2. 35.1)। आनर्चुः, आनर्हुरिति भाषायाम् चिच्युषे। 'च्युङ् गतौ' (भ्वा० 684) इत्यस्य धातोर्लिटि सेशब्देऽभ्यासस्य संप्रसारणमनिट् च निपातनात्। चिच्युषे (ऋ० 4.30.22)। चुच्युविष इति भाषायाम्। तित्याज। 'त्यज् हानौ' (भ्वा० 712) इत्यस्य धातोर्लिट्यभ्यासस्य संप्रसारणं निपात्यते। तित्याज (ऋ० 10.71.6)। तत्याजेति भाषायाम्। श्राता इति। 'श्रीञ् पाके' (क्रया० 3) इत्येतस्य धातोर्निष्ठायां श्राभावः। श्रातास्त इन्द्र सोमाः (मै० सं० 1.9.1)। श्रितमिति। तस्यैव श्रीणातेर्ह्रस्वत्वम्। सोमो गौरी अधिश्रितः (ऋ० 9.12.3)। श्रिता नौ गृहाः। अनयोः श्राभावश्रिभावयोर्विषय- विभागमिच्छन्ति सोमेषु बहुषु श्राभाव एव, अन्यत्र श्रिभाव इति। सोमादन्यत्र क्वचिदेकस्मिन्नपि श्राभावो दृश्यते। यदि श्रातो जुहोतन (ऋ० 10.179.1)। तस्य श्राता इति बहुवचनस्याविवक्षिततत्वादुप- संग्रहो द्रष्टव्यः। आशीराशीर्त इति। तस्यैव श्रीणातेराङ्पूर्वस्य क्विपि निष्ठायां च शीरादेशः, निष्ठायाश्च नत्वाभावो निपातनात्। तामाशीरा दुहन्ति। आशीर्त ऊर्जम्। क्षीरैर्मध्यत आशीर्तः (ऋ० 8.2.9)।।

सि०-एते छन्दसि निपात्यन्ते। इन्द्रश्च विष्णो यदपस्पृधेथाम् (ऋ० 6.69.8)। स्पधेः लङि आथाम्। अर्कमानृचुः (ऋ० 1.19.4)। वसून्यानृहु (शौ० सं० 2.35.1)। अर्चेरर्हेश्च लिटि उसि। चिच्युषे (ऋ० 4.30.22)। च्युङो लिटि थासि। यस्तित्याज (ऋ० 10.71.6)। त्यजेर्णलि। श्रातास्त इन्द्र सोमाः (मै० सं० 1.9.1)। श्रिता नो गृहाः। श्रीञ् पाके निष्ठायाम्। आशिरं दुह्रे (ऋ० 3. 53.14)। मध्यत आशीर्तः (ऋ० 8.2.9)। श्रीञ् एवं क्विपि निष्ठायां च।।

प्रस्तुत सूत्र में पूर्ववत् 'छन्दसि' 'सम्प्रसारणम्' की अनुवृत्ति आ रही है। अपस्पृधेथाम्-यह 'स्पर्ध संघर्षे' इस धातु का लङ् लकार में 'आथाम्' (मध्यम पुरुष द्विवचन) में रेफ का संप्रसारण तथा अकार लोप निपातन से

होता है। लोक में **'अस्पर्धेथाम्'** यह बनता है। दूसरे कहते हैं कि अप-पूर्वक स्पर्ध धातु से लङ् लकार में **'आथाम्'** प्रत्यय में संप्रसारण और आकार का लोप निपातन से होता है। **'बहुलं छन्दस्यमाङ्योगेऽपि'** (अष्टा० 6.4.75) से अट् आगम का आभाव होता है। लोक में **'अपास्पर्धेथाम्'** रूप बनता है। **आनृचुः**-**अर्च पूजायाम्**, **आनृहुः**-**अर्ह पूजायाम्** अर्थ में इन धातुओं के लिट् में उस् सम्प्रसारण और आकार का लोप निपातन से होता है। इसके बाद द्विवचन, ऋ का अत्व, हलादिशेषः, **'अत आदेः'** से दीर्घ, **'तस्मान्नुड् द्विहलः** (अष्टा० 7.4.71) से नुट् आगम। लोक में **आनर्चुः**, **आनर्हुः** बनते हैं। **'चिच्युषे'** में **'च्युङ् गतौ'** धातु से लिट् लकार के **'से'** (थासः से) परे रहते अभ्यास को सम्प्रसारण तथा अनिटत्व निपातन किया जाता है। च्यु च्यु से, निपातन से संप्रसारण होकर च् इ उच्यु से = चिच्यु से = चिच्युषे बना। **'आर्धधातुकस्येडवलादेः'** (अष्टा० 7.2.35) से इट् आगम प्राप्त था निपातन से अनिट्त्व भी कर दिया। लोक में **'चुच्युविषे'** बनेगा। **'तित्याज'** में त्यज् से लिट् के णल् परे रहते अभ्यास को संप्रसारण निपातन किया गया। लोक में **'तत्याज'** बनता है। श्राता, में श्रीञ् धातु को निष्ठा (क्त) परे रहते श्रा भाव निपातन किया है। श्रितम् में-श्रीञ् धातु को निष्ठा परे रहते ह्रस्वत्व निपातन है। आशीरा में आङ् पूर्वक श्रीञ् धातु को क्विप् परे रहते शीर् आदेश निपातन है। **आशीर्त्ताः** में आङ् पूर्वक श्रीञ् धातु को निष्ठा परे रहते शीर्भाव, तथा **'रदाभ्यां निष्ठातो०** (अष्टा 8.42.2) से प्राप्त निष्ठा के त को न का अभाव निपातन किया गया है।

वेदसंहिताओं में इस सूत्र के कतिपय प्रयोग प्राप्त होते हैं-

1. **अपस्पृधेथाम्।।**

   (क) **इन्द्रश्च विष्णो यदपस्पृधेथाम्।।**

   ऋ० 6.69.8 काठ० 12.14 तै० 3.2.11.2; 7.1.6.7;
   मै० 2.4.4; पै० 20.15.3; शौ० 7.45.1

2. **आनृचुः।।**

   (क) **य उग्रा अर्कमानृचुः।।** ऋ० 1.19.5; पै० 6.17.5

   (ख) **ते स्याम् आनृचुः।।** ऋ० 5.6.8।।

(ग) यस्मा अर्कं सप्तशीर्षाणमानृचुः।। ऋ० 8.51.4

(घ) विप्रासो अर्कमानृचुः।।

ऋ० 8.51.10; शौ० 20.119.2; कौ० 2.16.10; जै० 4.19.2

(ङ) यदानृचुस्तेनेयं सर्पराज्ञी।। तै० 7.3.1.3

3. आनृहुः।।

(क) ये भक्षयन्तो न वसून्यानृहुः।। तै० 3.2.8.3

4. चिच्युषे।।

(क) यस्ता विश्वानि चिच्युषे।। ऋ० 4.30.22

5. तित्याज।।

(क) यस्तित्याज सचिविदं सखायम्।। ऋ० 10.71.6

6. श्राताः।।

(क) श्रातास्त इन्द्र सोमा।। मै० 1.9.1 काठ० 9.8

7. श्रातः।।

(क) यदि श्रातो जुहोतन यद्यश्रातो ममत्तन।।

ऋ० 10.179.1; शौ० 7.75.1

(ख) श्रातं हविरो ष्विन्द्र प्र याहि।।

ऋ० 10.179.2; शौ० 7.75.2

(ग) श्रातं मन्य ऊधनि श्रातमग्नौ सुश्रातं मन्ये तदृतं नवीयः।।

ऋ० 10.179.3; शौ० 7.75.3

8. अधि-श्री अधिश्रितम्।।

(क) यद्यधिश्रितंस्कन्देद्यद्युद्वास्यमानम्।। मै० 1.8.3

(ख) वारुणमधिश्रितम्।। मै० 1.8.10।।

(ग) पुरोडाशं वा अधिश्रितम्।। मै० 4.1.9; काठ० 31.7

(घ) दिवि चन्द्रम् अधिक्षितम्।। पै० 20.555

9. आशिरम्।।

(क) विश्वा इत्ते धेनवो दुह्र आशिरं घृतं दुह्रत आशिरम्।।

ऋ० 1.114.6

(ख) नाशिरं दुह्रे न तपन्ति घर्मम्।। ऋ० 3.53.14

(ग) शुक्रा आशिरं याचन्ते।। ऋ० 8.2.10; जै० 4.21.9

(घ) सोमं ररत आशिरम्।। ऋ० 8.31.2

(ङ) इन्द्राय गाव आशिरम्।। ऋ० 8.69.6; शौ० 20.22.6

(च) हरे सृजान आशिरम्।। ऋ० 9.64.14; कौ० 2.842

(छ) इन्द्रायाऽऽशिवरं सह कुम्भ्याऽदात्।। तै० 3.2.8.5

(ज) आशिरमव नयति सशुक्रत्वायाथो सं भरति।।
तै० 6.1.6.5

(झ) धेन्वा क्रीणात्याशिरमेवास्य क्रीणाति।। मै० 3.7.7

(ञ) मन्थन्त्याशिरमिन्द्रे वा एतदग्रा आगते घोषमकुर्वता।।
मै० 4.6.8

(ट) यत् तृतीयसवन आशिरभवनयन्ति।। काठ० 23.10

(ठ) घृतं दुहतं आशिरम्।। कौ० 1.187।।

(ड) सत्यमाशिरं परमे व्योमनि।। कौ० 1.560

(ढ) स्वेदाञ्जिभिराशिरमिच्छमानः।। शौ० 20.91.6

10. आशीर्तः।।

(क) शुचिरसि पुरुनिष्ठाः क्षीरैर्मध्यत आशीर्तः।।
ऋ० 8.2.9; जै० 4.16.10

136. खिदेश्छन्दसि।। अष्टा० 6.1.52

का०–विभाषेति वर्तते। 'खिद दैन्ये' (रुधा० 12) इत्यस्य धातोरेचः स्थाने छन्दसि विषये विभाषा आकार आदेशो भवति। चित्तं चखाद। चित्तं चिखेद। छन्दसीति किम्? चित्तं खेदयति।।

सि०–खिद दैन्ये। अस्यैच आद्वा स्यात्। चखाद। चिखेदेत्यर्थः।।

इस सूत्र में 'विभाषा लीयतेः' (अष्ट्या० 6.1.51) से 'विभाषा' की, 'आदेच उपदेशेऽशिति' (अष्ट्या० 6.1.44) से 'आदैचः' की अनुवृत्ति आ रही है। 'खिद दैन्ये' धातु के एच् के स्थान में वेदविषय में विकल्प से आत्व होता है। उदा0–चखाद। खिद् धातु को लिट् लकार में गुण होकर प्रकृत सूत्र से आत्व करने पर द्वित्व एवं अभ्यासकार्य करके 'चखाद' बना। पक्ष में

विकल्प से '**चिखेद**' हो गया। वेदविषय में इसका क्या फल है? **चित्तं खेदयति**। यह लौकिक प्रयोग है, अतः आत्व नहीं होता है।

यद्यपि वेदसंहिताओं में खिद् धातु के **खिदसः** (ऋ० 5.19.1); **खिद्वः** (ऋ० 6.22.4; शौ० 20.36.4); **खेदया** (ऋ० 8.72.8; 77.3); **खेदाम्** (ऋ० 10.116.4) पदों का प्रयोग हुआ है, किन्तु प्राप्त-वेदसंहिताओं में सूत्रानुसार '**चिखेद**' '**चखाद**' पदों का प्रयोग कहीं नहीं हुआ है। अष्टाध्यायी के वृत्तिकारों ने जो उदाहरण दियें है, उनका स्थान अज्ञात है।।

137. शीर्षंश्छन्दसि।। अष्टा० 6.1.60

का०-शीर्षन्निति शब्दान्तरं शिरः शब्देन समानार्थं छन्दसि विषये निपात्यते, न पुनरयमादेशः शिरः शब्दस्य, सोऽपि हि छन्दसि प्रयुज्यत एव। शीर्ष्णा हि तत्र सोमं क्रीतं हरन्ति। यत्ते शीर्ष्णो दौर्भाग्यम् छन्दसीति किम्? शिरः।।

सि०-शिरःशब्दस्य शीर्षन् स्यात्। शीर्ष्णः शीर्ष्णो जगतः (ऋ० 7.66.15)।।

शीर्षन् शब्द वेदविषय में निपातन किया जाता है। शिरस् शब्द का पर्यायवाची यह शीर्षन् शब्द पृथक् निपातित है, न कि शिरस् को शीर्षन् आदेश निपातित किया है। '**शीर्ष्णा**' यह पद तृतीया विभक्ति का है तथा '**शीर्ष्णः**' यह षष्ठी का। '**अल्लोपोऽनः**' (अष्टा० 6.4.134) से अकार लोप हो गया। वेद में इसका क्या फल है? **शिरः**। यहाँ लौकिक प्रयोग में '**शीर्षन्**' निपातन नहीं होता है।।

वेदसंहिताओं में इस सूत्र के कतिपय प्रयोग प्राप्त होते हैं-

1. **शीर्ष्णः।।**
   - (क) **शीर्ष्णः क्षीरं दुह्रते गावो अस्य।।** ऋ० 1.164.7
   - (ख) **शीर्ष्णः शीर्ष्णो जगतस्तस्थुषस्पतिम्।।** ऋ० 7.66.15
   - (ग) **शीर्ष्णो द्यौः समवर्तत।।**
     ऋ० 10.90.14; मा० 31.13; का० 35.1.13; शौ० 19.6.8

(घ) तस्मादधस्ताच्छीर्ष्णः प्राणाः।। तै० 6.2.11.1

(ङ) तस्मात् पुरुषः सर्वाण्यन्यानि शीर्ष्णोऽङ्गानि।। तै० 7.5.8.2

(च) तस्मात् शीर्ष्णश्छिन्नाद्यो रक्षोऽक्षरत्।। मै० 2.5.6

(छ) यथा शीर्ष्णः कपालान्येवं कपालानि।। मै० 4.1.9

(ज) यदिदमुत्तरार्धँ शीर्ष्णो विष्णो रराटमसि।। काठ० 25.8

(झ) अग्रे शीर्ष्णः शमोऽप्यात्।। काठ० 1.14.3

(ञ) आ शीर्ष्णः शमोऽप्यात्।। शौ० 1.14.3

(ट) शीर्ष्णस्ते असिताः परि।। शौ० 6.136.2

2. शीर्ष- शीर्ष्णम्।।

(क) अलवतेर् आर् शीर्ष्णम् अथो अस्या यन् मुखम्।। पै० 11.2.5

3. शीर्ष्णा।।

(क) शीर्ष्णाशीर्ष्णोपवाच्यः।। ऋ० 1.132.2

(ख) शीर्ष्णा शिरः प्रति दधौ वरूथम्।। ऋ० 10.26.13

(ग) शीर्ष्णाऽग्नेः शिर उप दधामि।। तै० 5.5.8.2

(घ) शीर्ष्णा हि सोमं क्रीत हरन्ति।। मै० 3.6.8

(ङ) सोममेकेन शीर्ष्णापि बदन्।। काठ० 12.10।।

(च) यच्छीर्ष्णा हरेयुः।। काठ० 24.6

(छ) शीर्ष्णा शिरो वक्षसा वक्षो अर्धयत्।। जै० 4.10.4

(ज) शीर्ष्णा हरति धाणिकाम्।। शौ० 20.136.10

4. शीर्ष्णाम्।।

(क) शीर्ष्णामयातयामत्वाय प्राजापत्येन संस्थापयति।। तै० 5.18.3

5. शीर्ष्णे।।

(क) शीर्ष्णेशीर्ष्णे विबभाजा विभक्ता।। ऋ० 7.18.24

(ख) मुखाय त्वा मखस्य त्वा शीर्ष्णे।। मा० 37.3.6

एवं वेदसंहिताओं में इस सूत्र के छब्बीस प्रयोग उपलब्ध होते हैं।।

138. वा छन्दसि।। अष्टा० 6.1.106

का०-दीर्घात् छन्दसि विषये जसि च इचि च परतो वा पूर्वसवर्णदीर्घो न भवति। मारुतीश्चतस्त्रः (काठ० सं० 11.10) पिण्डीः। मारुत्यश्चतस्त्रः। पिण्ड्यः। वाराही उपानहा (मै० सं० 4.4.6)। वाराह्यौ उपानह्यौ (लौ० गृ० 3.7)।।

सि०-दीर्घाज्जसि इचि च पूर्वसवर्णदीर्घो वा स्यात्। वाराही (मै० सं० 4.4.6)। वाराह्यौ (लौ० गृ० 3.7)। मानुषीरीळते विशः (ऋ० 5.8.3)। उत्तरसूत्रद्वयेऽपीदं वाक्यभेदेन संबध्यते, तेनामि पूर्वत्वं वा स्यात्। शमीं च शम्यं च। सूर्म्यं सुषिरामिव (ऋ० 8.69.12)। (क) सम्प्रसारणाच्च (6.1.108)। इति पूर्वरूपमपि वा। इज्यमानः-यज्यमानः।।

इस सूत्र में **'दीर्घाज्जसि च'** (अष्या० 6.1.105) की, **'नादिचि'** (अष्या० 6.1.104) से **'इचि'** की **'प्रथमयोः पूर्वसवर्णः'** की **'अकः सवर्णे दीर्घः'** (अष्या० 6.1.101)। से **'दीर्घः'** की **'एकः पूर्वपरयोः'** (अष्या० 6.1.81) की, **'संहितायाम्'** (अष्या० 6.1.70) की अनुवृत्ति आ रही है। दीर्घ से उत्तर जस् तथा इच् प्रत्याहार परे रहते वेदविषय में पूर्वपर के स्थान में पूर्वसवर्ण दीर्घ एकादेश विकल्प से होता है। पूर्वसूत्र से नित्य निषेध प्राप्त था, उसका विकल्प करने से यहाँ विकल्प से पूर्वसवर्ण दीर्घ होता है। **मारुतीः, पिण्डीः** आदि में जस् परे रहते पूर्वसवर्ण दीर्घ हुआ है, तथा **मारुत्यः पिण्ड्यः** आदि में पूर्वसवर्ण दीर्घ नहीं हुआ है, सो यणादेश हो गया। **'औ'** परे रहते वाराही उपानही के **'वाराह्यौ' 'उपानह्यौ'** रूप बने हैं। इसी प्रकार **शमीम्। शम्यम्। सूर्म्यम्** भी बने।।

प्रस्तुत सूत्र के कतिपय प्रयोग वेदों में प्राप्त होते हैं-

1. **शमीम्।।**
   - (क) **यो वः शमीं शशमानस्य निन्दात्।।** ऋ० 5.42.10
   - (ख) **यस्याजुषन्नमस्विनः शमीमदुर्मखस्य वा।।** ऋ० 8.75.14
2. **सूर्म्यम्।।**
   - (क) **अनुक्षरन्ति काकुदं सूर्म्यं सुषिरामिव।।**
     ऋ० 8.69.12; शौ० 20.92.9

139. शेश्छन्दसि बहुलम्।। अष्टा० 6.1.70

का०-शि इत्येतस्य बहुलं छन्दसि विषये लोपो भवति। या क्षेत्रा। या वना (शौ० सं० 14.27)। यानि क्षेत्राणि (शौ० सं० 14.27)। यानि वनानि।।

सि०-लोपः स्यात्। या ते गात्राणाम्। ता ता पिण्डानाम्।। समन्नादिषु छन्दसि पररूपं वक्तव्यम्।। अपां त्वेमन्। अपां त्वोद्मन्।।

सूत्र में '**लोपो व्योर्वलि**' (अष्ट्या० 6.1.64) से '**लोपः**' की अनुवृत्ति आ रही है। शि का बहुल करके वेदविषय में लोप हो जाता है। '**जश्शसोः शि**' (अष्ट्या० 7.1.20) से जो शि होता है, उसका यहाँ विधान है। लोप करने के पश्चात् प्रत्ययलक्षण से '**नपुसंकस्य झलचः**' (अष्ट्या० 7.1.72) से 'नुम्' होकर, तथा '**सर्वनामस्थाने:०**' (अष्ट्या० 64.8) से नकार लोप होकर 'या' बना। बहुल कहने से जिस पक्ष में शि का लोप नहीं होगा, तो पूर्ववत् '**त्यदादीनामः**' (अष्ट्या० 7.2.102) आदि सूत्र लगकर 'यानि' बना।। **एमन्नादिषु छन्दसि पररूपं वक्तव्यम्।।** वेद में अवर्णान्त (अ या आ) पद से परे 'एमन्' आदि शब्दों के रहने पर पररूप एकादेश होता है। यहाँ 'एमन्' एकारादि है, आदिषु पद से ओकारादि पद भी लिये जायेंगे, यथा- **ओद्मन्**। वाजसनेयिप्रातिशाख्य में '**समुद्रस्येमँस्त्वेमँस्त्वोद्मन्निति च**' (वा० प्रा० 4.56) **समुद्रस्येमन्, त्वेमन्, त्वोद्मन्** में अ या आ से परे एकार या ओकार मिलकर पररूप एकादेश हो जाता है।।

वेद संहिताओं में प्रस्तुत सूत्र के अनेकशः प्रयोग मिलते हैं-

1. **एता।।**
   - (क) **नाकिष्ट एता व्रता मिनन्ति।।** ऋ० 1.68.4
   - (ख) **एता वो वशम्युद्यता यजत्रा।।** ऋ० 2.31.7
   - (ग) **एता विश्वा विदुषे तुभ्यम्।।** ऋ० 4.1.16
   - (घ) **एता ज्यौत्नानि ते कृता।।** ऋ० 8.77.9
   - (ङ) **एता त्या ते श्रुत्यानि केवला।।** ऋ० 10.138.6
   - (च) **एता ते अहन्ये नामानि देवेभ्यः।।** मा० 8.43
   - (छ) **तस्मादेता अबद्धा अस्थन्त्सा।।** मै० 4.2.13
   - (ज) **एता ते अग्न उचथानि वेधः।।** मै० 4.14.15

(झ) प्रजापते न हि त्वदन्यः एता।। काठ० 158

2. काव्या।।

(क) परि विश्वानि काव्या।।

ऋ० 2.5.3; मै० 2.13.5; कौ० 2.9.4

(ख) त्वदग्ने काव्या त्वन्मनीषाः।।

ऋ० 4.11.3; काठ० 21.14

(ग) अधा हि काव्या युवम्।। ऋ० 5.66.4

(घ) स मुदा काव्या पुरु विश्वं भूमा।। ऋ० 8.39.7

(ङ) परि यत्काव्या कविर्नृम्णा।। ऋ० 9.7.4; कौ० 2.11.31

(च) नि काव्या वेधसः शश्वतः।। तै० 2.2.12.1

(छ) अभि प्रियाणि काव्या।। जै० 4.7.5

3. जीविता।।

(क) वि सदृशा जीविताभिप्रचक्ष उषा।। ऋ० 1.113.6

(ख) अनूचीना जीविता मानुषेभ्यः।।

ऋ० 4.54.2; मा० 33.54; का० 32.4.11

4. ता।।

(क) ता ता पिण्डानां प्र जुहोम्यग्नौ।।

ऋ० 1.162.19; मा० 25.42 तै० 4.6.9.3

5. ध्रुवा।।

(क) ध्रुवा यानि देवा अकृण्वत।। ऋ० 1.36.5

(ख) विद्वाँ अस्य व्रता ध्रुवा।। ऋ० 2.5.4

(ग) वास्तोष्पते ध्रुवा स्थूणाम्।। ऋ० 8.17.14

6. वना।।

(क) मृगा इव हस्तिनः खादथा वना।। ऋ० 1.64.7

(ख) आ यो वना तातृषाणो न भाति।। ऋ० 2.4.6

(ग) वना वृश्चन्ति शिक्वसः।। ऋ० 6.2.6; तै० 3.1.11.6

(घ) वना वनन्ति धृषता रुजन्तः।। तै० 3.3.11.2

7. व्रता।।

(क) न किष्ट एता व्रता मिनन्ति।। ऋ० 1.69.4

(ख) व्रता देवस्य सवितुर्मिनन्ति।। ऋ० 2.38.7

(ग) मित्रस्य व्रता वरुणस्य दीर्घश्रुत।। ऋ० 8.25.17

(घ) त्रीणि व्रता विदथे अन्तरेषाम्।। तै० 2.1.11.5

"एमन्नादिषु छन्दसि पररुपं वक्तव्यम्"- इस वार्तिक से प्राप्त उदाहरण-

8. एमन्।।

(क) प्रजापतिष्ट्वा सादयत्वपां पृष्ठे समुद्रस्येमन्।। मा० 13.17

(ख) अपां त्वेमन्त्सादयामि।। मा० 13.53

'एमन्' के मात्र दो प्रयोग ही मिलते हैं।।

140. भय्यप्रवय्ये चच्छन्दसि।। अष्टा० 6.1.82

का०-बिभेतेर्धातोः प्रपूर्वस्य च वी इत्यचेतस्य यति प्रत्यये परतश्छन्दसि विषयेऽयादेशो निपात्यते। भय्यं किलासीत् (द्र०-काठ० सं० 33.4)। वत्सतरी प्रवय्या। भय्येति 'कृत्यल्युटो बहुलम्' (3.3.113) इत्यपादाने यत् प्रत्ययः। बिभेत्यस्मादिति भय्यम्। प्रवय्या इति स्त्रियामेव निपातनम्। अन्यत्र प्रवेयमित्येव भवति। छन्दसीति किम्? भेयम्। प्रवेयम्।। ह्रदय्या आप उपसंख्यानम्।। ह्रदय्या आपः। ह्रदे भवाः, 'भव छन्दसि' (4.4.110) यत् प्रत्ययः।।

सि०- बिभेत्यस्मादिति भय्यः। वेतेः प्रवय्या इति स्त्रियामेव निपातनम्। प्रवेयमित्यन्यत्र। छन्दसि किम्? भेयम्। प्रवेयम्।। ह्रदय्या उपसङ्ख्यानम्।। ह्रदे भवा ह्रदय्या आपः। 'भवे छन्दसी' ति यत्।।

'धातोस्तन्निमित्तस्यैव' (अष्टा० 6.1.77) से 'धातोः' की, 'वान्तो यि प्रत्यये' (अष्टा० 6.1.76) से 'यि प्रत्यये' की तथा पूर्ववत् 'संहितायाम्' की अनुवृत्ति प्रस्तुत सूत्र में आ रही है। भय्य तथा प्रवय्य शब्द भी वेदविषय में निपातन किये जाते हैं। ञिभी धातु से तथा प्रपूर्वक वी धातु से यत् प्रत्य परे रहते अयादेश निपातित है, संहिता के विषय में। भय्यम्। प्रवय्यम्। भय्यः, यहाँ कृत्यल्यु० (अष्टा० 3.3.113) से अपादान में यत् प्रत्यय पूर्ववत् जानें। बिभेत्स्मादिति भय्यम्। प्रवय्या स्त्रीलिङ्ग में ही निपातन है। अन्यत्र प्रवेयम्-

यह होता है। वेदविषय में – इसका क्या फल है? **भेयम्**। लौकिक प्रयोग में अय् नहीं होता है। आप् = जल अर्थ में **हृदय्या** इसका उपसंख्यान करना चाहिए। उदा०–**हृदय्या आपः**। **हृदे भवा** – इस अर्थ में **'भवे छन्दसि'** (अष्टा० 4.4.110) से यत् प्रत्यय होता है, हृद + य, अ का अय् होता है – हृदय्‌ य + टाप्।।

प्रस्तुत सूत्र का प्रयोग मिलता है–

1. **भय्यम्**।।
   (क) **वाश्वतरः प्रदाहादा भय्यं किल**।। काठ० 33.4
   'हृदय्या आप उपसंख्यानम्' वार्तिक के अनुसार भी कतिपय प्रयोग मिले हैं।
2. **हृदय्यम्**।।
   (क) **अग्निं हृदय्यंशोकं निर्वापयामसि**।। शौ० 6.18.1
3. **हृदय्यया**।।
   (क) **श्रद्धां हृदय्य? याकूत्या श्रद्धया विन्दते वसु**।।
   ऋ० 10.151.4
4. **हृदय्याय**।।
   (क) **नमो हृदय्याय च**।। मा० 16.44; तै० 4.5.9.1

'प्रवय्यः' का प्रयोग वेदसंहिताओं में प्राप्त नहीं हुआ है।।

141. प्रकृत्यान्तः पादमव्यपरे।। अष्टा०, 1.115

का०–एङोऽति इत्येव एङ इति यत् पञ्चम्यन्तमनुवर्तते, तदर्थादिह प्रथमान्तं भवति। प्रकृतिरिति स्वभावः कारणं वाभिधीयते। अन्तरित्यव्यय- मधिकरणभूतं मध्यमाचष्टे। पादशब्देन च ऋक्पादस्यैव ग्रहणमिष्यते, न तु श्लोकपादस्य। अवकारयकारपरेऽति परत एङ् प्रकृत्या भवति। स्वभावेनाव- तिष्ठते, कारणात्मना वा भवति, न विकारमापद्यते। तौ चेद् निमित्तकार्यिणावन्तः पादमृक्पादमध्ये भवतः। ते अग्रे अश्वमायुञ्जन् (मा० सं० 9.7) ते अस्मिन् जवमादधु (मा० सं० 9.7)।। उपप्रयन्तो अध्वरम् (ऋ० 1.74.1)। शिरो अपश्यम्

(ऋ० 1.16.36)। सुजाते अश्वसूनृते (ऋ० 5.79.1)। अध्वर्यो अद्रिभिः सुतम् (ऋ० 9.51.1)। अन्तः पादमिति किम्? कया मती कुत एतास एतेऽचन्ति (ऋ० 1.165.1)। अव्यपर इति किम्? तेऽवदन् (ऋ० 10.108.1) तेजोऽयस्मयम् (मा० सं० 12.63)। एङिति किम्? अन्वग्निरुषसामग्रमख्यत् (शौ० सं० 7.82.4)। केचिदिदं सूत्रं नान्तः पादमव्यपर इति पठन्ति ते संहितायामिह यदुच्यते तस्य सर्वस्य प्रतिषेधं वर्णयन्ति।।

सि०- ऋक्पादमध्यस्थ एङ् प्रकृत्या स्यादिति परे, न तु वकारयकारपरेऽति। उपप्रयन्तो अध्वरम् किम्? एतास एतेऽर्चन्ति (ऋ० 1.165.1) अव्यपरे किम्? तेऽवदन् (ऋ० 10.108.1) तेऽयजन्।।

प्रस्तुत सूत्र में '**एङः पदान्तादति**' (अष्या० 6.1.105) से '**एङः अति**' की तथा पूर्ववत '**संहितायाम्**' की अनुवृत्ति आ रही है। '**एङः**' यह जो पञ्चम्यन्त यहाँ अनुवृत्त होता है वह अर्थ के सामञ्जस्य के कारण प्रथमान्त हो जाता है। प्रकृति इससे स्वभाव अथवा कारण कहा जाता है। अन्तः यह अव्यय अधिकरण भूत मध्य को कहता है। पाद-शब्द से ऋक्पाद का ही ग्रहण होता है, श्लोक के पाद का नहीं। अवकार और अयकर (व, य रहित) ऐसे अत् के परे रहते एङ् प्रकृति रूप से रहता है। स्वभाव में ही रहता है, कारणरूप में ही रहता है, किसी विकार (परिवर्तन) को नहीं प्राप्त करता है। यदि वे निमित्त और कार्यो अवकार यकारपरक अकार तथा एङ, अन्तःपादम=ऋक् के पाद के मध्य में हों तो। उदा०- **ते अग्रे अश्वमायुञ्जन्** ते + अग्रे अश्वम् = यहां पूर्वरूप तथा अय् आदेश नहीं होते हैं। **ते अस्मिन् जवमादधुः**। ते+ अस्मिन यहां भी पूर्णरूप और अयादेश नही हुआ। **उपप्रयन्तो अध्वरम्**। पूर्वरूप और अवादेश नहीं होता। **सुजाते अश्वसूनृते**। पूर्णरूप और अय आदेश नहीं होता है। **अध्वर्यो अद्रिभिः सुतम्**। पूर्वरूप और अय् आदेश नहीं होता है। **अध्वर्यो अद्रिभिः सुतम्**। पूर्वरूप और अव् आदेश नहीं होता। पाद के मध्य में इसका क्या फल है? **कया मती कुत एतास एतेऽर्चयन्ति**। एते + अचर्ष्यन्ति यहां अकार पाद के आदि में है मध्य में नहीं, प्रकृतिभाव नहीं होता है। वकारपरक और यकारपरक अकार न होने पर- इसका क्या फल है? **तेऽवदन्**। **तेऽयस्मन्**

यहां वकार और यकार अकार के बाद होने से प्रकृतिभाव नहीं होता है। एङ का प्रकृतिभाव- इसका क्या फल है। **अन्वग्निरूपत्मग्रिख्यत्**। अनु + अग्निम् में एङ् नहीं है। अतः प्रकृतिभाव न होकर यण् होता है। कुछ लोग इस सूत्र को **नान्तः पादमव्यपरे** ऐसा पढ़ते हैं, वे लोग ऐसा कहते है- संहिता में यहां जो भी कहा जाता है उस सब का प्रतिषेध होता है।

वैसे इस प्रकरण में '**छन्दसि**' का निर्देश नहीं है, पुनरपि इस प्रकरण के अत्यधिक सूत्र वैदिक ही है, क्योंकि लौकिक पादबद्ध पद्यो में यहा कार्य दृष्टिगत नहीं होता। '**सर्वत्र विभाषा गो०**' (अष्य० 6.1.118) में पठित सर्वत्र पद से यही ज्ञात होता है। शुक्ल यजुर्वेद प्रातिशाख्य में '**प्रकृतिभाव ऋक्षु**' (4.82) से प्रकृतिभाव होता है, 'ऋक्षु' पद का अर्थ 'ऋग्वेद में' है।

प्रस्तुत सूत्र के वेद में अनेकशः प्रयोग मिलते हैं-

(क) **इन्द्रं नो अग्ने वसुभिः सजोषा।।** ऋ० 7.10.4

(ख) **विश्वे देवासो अप्तुरः।।** ऋ० 1.3.8

(ग) **विश्वे देवासो अस्त्रिधः।।** ऋ० 1.3.9

(घ) **अथा ते अन्तमानाम्।।** ऋ० 1.4.3।।

(ङ) **मा नो अति ख्य आ गहि।।** ऋ० 1.4.3

142. अव्यादवधादवक्रमुरव्रतायमवन्त्ववस्युषुच।। अष्टा० 61.116

का०-अव्यात् अवधात् अवक्रमुः अव्रत अयम् अवन्तु अवस्यु इत्येतेषु वकारयकारपरेऽप्यति परतोऽन्तःपादमेङ् प्रकृत्या भवति। अग्निः प्रथमो वसुभिर्नो अव्यात् (तै० सं० 2.1.11.2) मित्रमहो अवद्यात् (ऋ० 4.4.15) माशिवासो अवक्रमुः (ऋ० 7.32.26)। ते नो अव्रताः शातवारो अयं मणिः (शौ० सं० 19.36.5)। ते नो अवन्तु पितरः (ऋ० 10.15.1) कुशिकासो अवस्यवः (ऋ० 3.41.9)

सि०-एषु व्यपरेऽप्यति एङ् प्रकृत्या भवति। वसुभिर्नो अव्यात् (तै० सं० 2.1.11.2)। मित्रमहो अवद्यात् (ऋ० 4.5.15) मा शिवासो अवक्रमुः (ऋ० 7.32.26)। ते नो अव्रताः। शतधारो अयं

मणिः (शौ० सं० 19.36.5)। ते नो अवन्तु (ऋ० 10.15.1)। कुशिकासो अवस्यव (ऋ० 3.42.9) यद्यपि बह्वचैस्तेनोऽवन्तु रथतूः सोऽयमागात् तेऽरुणेभिरित्यादौ प्रकृतिभवो न क्रियेत तथापि बाहुलकात्समाधेयम्। प्रातिशाख्ये तु वाचनिक एवायमर्थः।।

इस सूत्र में **'प्रकृत्यान्तःपादम्, एङः'**, अति, संहितायाम् की अनुवृत्ति पूर्ववत् आ रही है। **अव्यात् अवद्यात् अवक्रमुः अव्रत, आयम् अवन्तु, अवस्यु**– इन शब्दों में जो आकार उसके परे रहते पाद के मध्य में जो एङ् उस को भी प्रकृतिभाव हो जाता है, अर्थात् सन्धि नहीं होती। उदा०–**अग्निः प्रथमो वसुभिर्नो अव्यात्। नो+अव्यात्। मित्रमहो अवद्यात्। मित्रमहो + अवद्यात्। मा शिवासो + अवक्रमुः। ते नो + अव्रताः। शतधारो + अयं मणिः। ते नो + अवन्तु। कुशिकासो + अवस्यवः।** – इनमें 'ओ' का अवादेश और पूर्वरूप प्राप्त है, बाध करके प्रकृति–भाव होता है। यद्यपि इस सूत्र के उदाहरणों में पूर्वसूत्र से ही प्रकृतिभाव प्राप्त था। पुनरपि इस सूत्र की रचना से ज्ञात हाता है कि पूर्वसूत्र में वकार यकार परे हैं जिस अकार के, उसके परे प्रकृतिभाव नहीं होता है। यह सूत्र **'प्रकृत्यान्तः पादमव्यपरे'** का अपवाद है। ऋग्वेद प्रातिशाख्य में एक नियम आता है–

अन्तः पादमकारच्चेत्संहितायां लघोर्लघु। यकाराद्यक्षरं परं वकाराद्यपि वा भवेत्।। 35।।

अर्थात् यदि संहितापाठ में लघु अकार से परे यकार से या वकार से प्रारम्भ होने वाला लघु अक्षर होवे, तब वह अकार 'अभिनिधान' (पूर्वरूप) को प्राप्त करता है। अर्थात् प्राकृत और वैकृत (एकार और ओकार) के साथ मिलकर एक हो जाता है जैसे– 'ते नोऽवन्तु रथतूः' 'सोऽयमागात्' 'तेऽरुणेभिः'। वस्तुतः 'एङः पदान्तादति' से होने वाले पूर्वरूप की स्थिति में ऋग्वेद में अनेक स्थलों पर 'अ' अभिनिहित सन्धि (पूर्वरूप सन्धि) को प्राप्त न करके प्रकृतिभाव से रहता है। ऋग्वेद की बह्वचशाखा वाले **'प्रकृत्यान्तः पादमव्यपरे'** की शर्तो में भी प्रकृतिभाव न मानकर अभिनिहित सन्धि (पूर्वरूप सन्धि) मानते हैं। साथ ही जिन शब्दों में आचार्य पाणिनि ने प्रकृतिभाव माना

है उन्हीं शब्दों में आचार्य शौनक ने पूर्वरूप सन्धि मानी है। शुक्ल यजुर्वेद प्रातिशाख्य में भी यकार और वकार बाद में होने पर भी अकार का 'व्यपरे च' (वा० प्रा० 4.74) सूत्र से अभिनिधान हो जाता है। यहाँ 'एदोदभ्यां पूर्वमकारः' (वा०प्रा० 4.62) सूत्र से ए, ओ के परे अकार की अनुवृत्ति आ रही है। तब अर्थ हुआ - एङ् (ए, ओ) से परे वकार या यकार परक 'अ' के रहते पूर्वरूप हो जाता है। **तेऽवन्तु। ते + अवन्तु।।**

एवं ऋग्वेद के बह्वृचशाखा वालों ने जिस अर्थ को माना है, ऋक्प्रातिशाख्य में वही अर्थ है। **'गाहमान'** (वा० प्रा० 4.65) आदि वाजसनेयिप्रातिशाख्य के सूत्रों द्वारा ऋचाओं में अभिनिधान को कहा गया है। प्रकृतिभाव ऋ क्षु (वा० प्रा० 4.82) सूत्र से ऋचाओं में प्रकृतिभाव होता है।

प्रकृतसूत्र के प्राप्त-प्रयोग हम उद्धृत कर रहे हैं-

1. **अवद्यात्।।**

   (क) **द्रुहो निदो मित्रमहो अवद्यात्।।**

   ऋ० 4.4.15; तै० 1.2.14.6; मै० 4.11.5; काठ० 6.11

2. **अव्यात्।।**

   (क) **अग्निः प्रथमो वसुभिर्नो अव्यात्।।**

   तै० 2.1.11.2; मै० 4.12.12 काठ० 10.12

   (ख) **धिय इन्वानो धिय इन्नो अव्यात्।।** मै० 4.9.11

   (ग) **नराशंसोग्नास्पतिर्नो अव्यात्।।** मै० 4.14.6

   (घ) **देवानां देवो निधिपा नो अव्यात्।।** मै० 4.14.12

3. **अवक्रमुः।।**

   (क) **माशिवासो अवक्रमुः।।**

   ऋ० 7.32.27; शौ० 20.79.2 जै० 4.307

4. **अव्रतम्।।**

   (क) **व्रतैः सीक्षन्तो अव्रतम्।।** ऋ० 6.14.3

5. **अवन्तु।।**

   (क) **अधि ब्रुवन्तु ते अवन्त्वस्मान्।।** तै० 26.12.3

(ख) इमं यज्ञं विश्वे अवन्तु देवाः।। काठ० 35.3

(ग) तं त्वा विश्वे अवन्तु देवाः।। पै० 15.6.9

6. अवस्यवः।।

(क) कुशिकासो अवस्यवः।। ऋ० 3.42.9; शौ० 20.24.9

वेदसंहिताओं में 'अयम्' परे रहते प्रकृतिभाव होने का प्रयोग प्रयुक्त नहीं हुआ है। उपर्युक्त पदों के मात्र इतने ही उदाहरण मिले हैं।।

143. यजुष्युरः।। अष्टा० 6.1.126

का०–उरः शब्द एङन्तो यजुषि विषयेऽति प्रकृत्या भवति। उरो अन्तरिक्षम्। अपरे 'यजुष्युरो' इति सूत्रं पठन्ति, उकारान्तमुरुशब्दं संबुद्ध्यन्तमधीयते। त इदमुदाहरन्ति– उरो अन्तरिक्षं सजूः (तै० सं० 1.3.8.1) इति। यजुषि पादानामभावादनन्तः पादार्थं वचनम्।।

सि० – उरः शब्द एङन्तोऽति प्रकृत्या यजुषि। उरो अन्तरिक्षम् (तै० स० 13.8.1) यजूषि पादाऽभावादनन्तःपादार्थं वचनम्।।

इस सूत्र में पूर्ववत् प्रकृत्या, एङः, अति, संहितायाम्, की अनुवृत्ति आ रही है। यजुर्वेद विषय में उरः शब्द से जो एङन्त उसे प्रकृतिभाव होता है, अकार परे रहते। 'उरस्' के 'स्' को पहले रुत्व करके पश्चात् 'अतो रोरप्लु०' (अष्टा० 6.1.109) से 'रु' को 'उ' हुआ। तत्पश्चात् 'आद् गुणः' (अष्टा० 6.18.4) लगकर 'उरो' एङन्त बन गया। तब 'अन्तरिक्षम्' का अकार परे रहते प्रकृतिभाव हो गया। दूसरे कतिपय विद्वान् इस सूत्र को 'यजुष्युरो' ऐसा पढ़ते हैं, उकारान्त उरु शब्द सम्बुध्यन्त (सम्बोधन एकवचनान्त) पढ़ते हैं, वे इस उदाहरण को उपस्थित करते हैं– 'उरो अन्तरिक्षं सजूरिति'। काशिका की पूर्व व्याख्या के अनुसार 'उरस्' के 'स्' का उत्व और 'आद् गुणः' से गुण होकर 'उरो' रूप बनता है। यजुर्वेद में पाद न होने के कारण अनन्तःपदार्थ (पादमध्य) से भिन्न स्थलों के लिये यह सूत्र है। क्योंकि यजुर्वेद में तो अधिकांश गद्य हैं। वाजसनेयि प्रातिशाख्य के–'हेऽआपो गुवोऽपाग्ने धीरासो देवास उरो रक्षा णो मो वैश्वानरो वृषभो वचः प्राणः उदानोऽङ्ग इमा मे वृष्णो दशमास्योऽन्ध आवित्तोऽरिष्टो अर्जुनः प्रत्याश्रावः स्विष्टो घासे

प्रणीतस्तेभ्यो नमो अस्तु दूरे नो अद्य यज्ञे सधस्थे सो अध्वरायेन्द्रे हिरण्यपर्णे द्वारो देवोऽब्दो रथिभ्यो महद्भ्यः संसदः' (4.85) में कहा है कि इन शब्दों के एकार और ओकार प्रकृतिभाव से रहते हैं अकार परे रहते।

इस सूत्र के जो प्रयोग वेदों में हैं, उन्हें हम स्थापित करते हैं-

1. उरो।।
   - (क) **द्यावापृथिवी उरो अन्तरिक्षम्**।। मा० 4.7
   - (ख) **उरो अन्तरिक्षं सजूर्देवेन**।। तै० 1.3.8.1; मै० 1.2.15
   - (ग) **द्यावापृथिवी उरो अन्तरिक्षः**।। मै० 1.2.2।।
   - (घ) **उरो अन्तरिक्ष सजूर्देवेन**।। मै० 3.9.7; काठ० 36
   - (ङ) **द्यावापृथिवी उरो अन्तरिक्षेति**।। मै० 3.6.4।
   - (च) **आप ओषधय उरो अन्तरिक्षानु**।। काठ० 2.2

144. आपोजुषाणोवृष्णोवर्षिष्ठेऽम्बेऽम्बालेऽम्बिकेपूर्वे।।
अष्टा० 6.1.118

का०-यजुषीत्येव। आपो जुषाणो वृष्णो वर्षिष्ठे इत्येते शब्दा अम्बे अम्बाले इत्येतौ च यावम्बिके शब्दात् पूर्वौ यजुषि पठितौ तेऽति परतः प्रकृत्या भवन्ति। आपो अस्मान्मातरः शुन्धयन्तु (मा० सं० 4.2)। जुषाणो अप्तुराज्यस्य (मा० सं० 5.35)। वृष्णो अंशुभ्यां गभस्तिपूतः (मा० सं० 7.1)। वर्षिष्ठे अधिनाके (तै० सं० 1.1.8.2)। अम्बे अम्बाले अम्बिके। यजुषीदमीदृशमेव पठ्यते। अस्मादेव निपातनाद् 'अम्बार्थनद्योर्ह्रस्वः' (7.3.107) इति ह्रस्वत्वं न भवति।।

सि०-यजुषि अति प्रकृत्या। आपो अस्मान्मातरः (मा० सं० 4.2)। जुषाणो अग्निराज्यस्य (का० 6.3.7)। वृष्णो अंशुभ्याम् (मा० सं० 7.1)। वर्षिष्ठे अधिनाके (तै० सं० 1.1.8.2)। अम्बे अम्बाले अम्बिके। अस्मादेव वचनात् अम्बार्थेति ह्रस्वो न।।

इस सूत्र में **'यजुष्युरः'** (अष्टा० 6.1.117) से **'यजुषि'** की तथा **पूर्ववत् प्रकृत्या, अति, संहितायाम्** की अनुवृत्ति आ रही है। **आपो, जुषाणो, वृष्णो, वर्षिष्ठे**-ये पद, तथा **अम्बिके** शब्द से पूर्व **अम्बे, अम्बाले** ये दो पद

यजुर्वेद में पठित होने पर अकार परे रहते प्रकृतिभाव से रहते हैं। सर्वत्र **'एङः पदान्ता:'**० (अष्टा० 6.1.105) से प्राप्त सन्धिकार्य नहीं होता। **आपो जुषाणो** आदि सारे पद अनुकरणरूप अविभक्त्यन्त सूत्र में पढ़े हुये हैं। **अम्बे अम्बिके अम्बाले**–ऐसा ही पाठ यजुर्वेद में है। इसी निपातन के कारण **'अम्बार्थनद्योर्ह्रस्वः'** (अष्टा० 7.3.107) से **'अम्बे'** का ह्रस्व भी नहीं होता है। **अम्बे, अम्बाले** तथा **अम्बिके**–इन तीनों शब्दों में यह ध्यान देना चाहिये कि अम्बिके शब्द के पूर्व दोनों शब्द–**अम्बे** एवं **अम्बाले** क्रमशः एक दूसरे के एङ् के परे पड़ता है, इसका अर्थ यह है कि **'अम्बे'** सम्बोधन एकवचन के अन्तिम अच् ए (एङ्) के परे **'अम्बाले'** सम्बोधन एकवचन के अत् 'अ' के होने से इस सूत्र से प्रकृतिभाव हो गया। इसी प्रकार **'अम्बाले'** के एङ् (ए) के परे 'अत्' ('अम्बिके') के होने से प्रकृतिभाव हो गया। तात्पर्य यह है कि **'अम्बिके'** के पूर्व **'अम्बे'** तथा **'अम्बाले'** में प्रकृतिभाव हो गया। वाजसनेयि प्रातिशाख्य में **'पणयो जहीमोऽम्बिके'** (4.77) अर्थात् **पणयः, जहीमः** और **अम्बिके** से परवर्ती अकार का अभिनिधान होता है–कहा गया है। साथ ही यह भी कहा है कि **'जुषाणश्चानध्वनि'** अर्थात् अध्वन् बाद में न होने पर (= अध्वन् से अन्य कोई अकारादि पद बाद में होने पर) **जुषाणः** (= जुषाणो का औकार) भी प्रकृतिभाव से रहता है।

वेदसंहिताओं में इस सूत्र के प्रयोग मिलते हैं–

1. **आपो।।**

(क) **आपो अस्मान्मातरः शुन्धयन्तु।।**

मा० 4.2; का० 4.1.2 तै० 1.2.1.1;

(ख) **समापो अद्भिरग्मत।।**

मा० 6.28; का० 6.7.6; तै० 1.1.8.1

(ग) **तस्यापो अप्सरस ऊर्जो नाम।।** मा० 18.41।।

(घ) **यदापो अघन्या इति वरुणेति।।** मा० 20.18

(ङ) **अन्वापो अजिहत् जायमानम्।।** तै० 1.7.13.1

(च) **यदापो अघन्या वरुणेति।।** मै० 1.2.18; काठ० 3.8

(छ) **देवीरापो अपां नपाद्य।।** मै० 1.3.1; काठ० 3.9।।

(ज) तस्मादापो अनुष्ठन्।। मै० 2.13.1

(झ) आपो अस्मान् मातरस्सूदयन्तु।। काठ० 2.1

2. जुषाणो।।

(क) जुषाणो अग्निर्वेतु स्वाहा।। मा० 3.10; का० 3.2.3

(ख) जुषाणो अप्तुराज्यस्य वेतु स्वाहा।।

मा० 5.35; का० 3.9.1; काठ० 3.1;

तै० 1.3.4.1; 6.3.2.2; मै० 1.2.1.3

(ग) जुषाणे अग्निः पृथुर्धर्मणस्पतिराज्यस्य वेतु स्वाहा।।

मा० 10.29

(घ) देवा आज्यपा जुषाणो अग्निर्भेषजं पयः।।

मा० 21.40; मै० 3.11.2

(ङ) जुषाणो अग्निराज्यस्य वेतु स्वाहा।। का० 6.3.7

(च) जुषाणो अस्य हविषो वीहि स्वाहा।। मै० 1.8.6

(छ) जुषाणो अस्य हविषो घृतस्य वीहि स्वाहा।। काठ० 9.5

(ज) जुषाणो अप्तुरित्यप्तुमेवैनं कृत्वा।। काठ० 26.2

3. वृष्णो।।

(क) वृष्णो अंशुभ्याँ गभस्तिपूतः।।

मा० 7.1; का० 7.11.8 तै० 1.4.2.1;

काठ० 27.1

(ख) पृच्छामि त्वा वृष्णो अश्वस्य रेतः।।

मा० 23.61; तै० 7.4.18.2

(ग) अयज्ज सोमो वृष्णो अश्वस्य रेतः।।

मा० 23.62; का० 25.10.10

(घ) महत्तद्वृष्णो असुरस्य नामा।। मा० 33.22

(ङ) वृष्णो अश्वस्य संदानमसि।।

तै० 2.4.7.2; 2.4.9.4; मै० 2.4.7.8;

(च) प्र पिन्वत वृष्णो अश्वस्य धाराः।।

तै० 3.1.11.7; काठ० 11.13

(छ) वृष्णो अंशुभ्यामिति।। तै० 6.4.5.3।।

(ज) वृष्णो अश्वस्य निष्पदसि।। मै० 4.9.1

(झ) वाजिन् वृष्णो अंशुभ्याम्।। काठ० 4.1

(ञ) वृष्णो अश्वस्य रेतो देवानां यातुरसि।। काठ० 37.13; 14

(ट) वृष्णो अश्वस्य रेतो ब्रह्मैव वाचः परमं व्योम।।

काठ० 44.7

4. वर्षिष्ठे।।

(क) वर्षिष्ठे अधिनाके।।

मा० 1.22 तै० 1.1.8.2; 1.4.43.2; 1.5.5.4; मै० 1.1.9; 4.1.9; 1.1.12; 1.3.37;

5. अम्बे।। अम्बिके।। अम्बाले।।

(क) अम्बे अम्बिकेऽम्बालिके न मा नयति कश्चन।।

मा० 23.18; का० 25.5.1;

(ख) अम्बे अम्बाल्यम्बिके न मा नयति कश्चन।।

तै० 7.4.19.1; काठ० 44.8

(ग) अम्बे अम्बाल्यम्बिके न मा यभति कश्चन।।

तै० 7.4.19.3;

(घ) अम्बेम्बिके अम्बालिके न मा नयति कश्चन।।

मै० 3.12.20

अम्बे, अम्बाले, अम्बिके पाठ यजुर्वेद की किसी भी शाखा में नहीं है। यजुर्वेद की शाखाओं में जिस प्रकार का पाठ है, वह हमने ऊपर दिखा दिया। सम्भव है कि आचार्य पाणिनि के समय यजुर्वेद की कोई शाखा रही हो जिसमें यह पाठ हो। 'अम्बाले' का उदाहरण हमें प्राप्त नहीं हुआ।।

145. अङ्ग इत्यादौ च।। अष्टा० 6.1.119

का०–अङ्गशब्दे य एङ् तदादौ चकारे यः पूर्वः स यजुषि विषयेऽति प्रकृत्या भवति। ऐन्द्र प्राणो अङ्गे अङ्गे अदीध्यत्। ऐन्द्र प्राणो अङ्गे अङ्गे नि दीध्यत् (मा० सं० 6.20)। ऐन्द्र प्राणो अङ्गे अङ्गे अशोचिषम्।।

सि०-अङ्गशब्दे य एङ् तदादौ च अकारे य एङ्पूर्वः सोऽति प्रकृत्या यजुषि। प्राणो अङ्गे अङ्गे अदीव्यत्। अङ्गे अङ्गे अशोचिषम्।।

इस सूत्र में **यजुषि, प्रकृत्या, एङः, अति, संहितायाम्** की पूर्ववत् अनुवृत्ति आ रही है। 'अङ्ग' शब्द के आदि में जो अकार उसके परे रहते पूर्व एङ् (किसी शब्द में स्थित) को प्रकृतिभाव होता है, अर्थात् सन्धि नहीं होती। इति शब्द से यहाँ अङ्ग शब्द का ही प्रत्यवमर्श किया गया है। चकार से किसी शब्द में स्थित अकार परे रहते अङ्ग शब्द के एङ् को प्रकृतिभाव होता है, अर्थात् अङ्ग शब्द में स्थिति ही अकार परे हो यह आवश्यक नहीं है, अतः '**अङ्गे अशोचिषम्**' में प्रकृतिभाव सिद्ध हो जाता है और तदादि=अङ्ग शब्द के अकार के परे रहते कोई भी एङ् पूर्व हो उसे भी प्रकृतिभाव होता है, अर्थात यह आवश्यक नहीं रहा कि अङ्ग शब्द का ही एङ् हो, किसी भी शब्द में स्थित एङ् हो, इसलिये '**प्राणो अङ्गे**' में '**प्राणो**' के ओकार को प्रकृतिभाव हो जाता है।-ये दो वाच्यार्थ गृहीत होते हैं। नागेश भट्ट का कथन है कि '**सूत्रे इति शब्दः तच्छब्दसमानार्थ इति भावः**' अर्थात् सूत्र में '**इति**' शब्द तच्छब्दासमानार्थ का द्योतक है। एवं आचार्य ने जो सूत्र '**अङ्गे इत्यादौ च** 'इस रूप में पढ़ा है वह '**अङ्गे अङ्गे आदौ च**' इस रूप में स्पष्टता हेतु पढ़ना उचित था। यहाँ दूसरे '**अङ्गे**' शब्द के लिये ही आचार्य ने '**इति**' पद-प्रयुक्त किया है। आचार्य कात्यायन ने '**हेड आपो गुवोऽपाग्ने धीरासो देवास उरो रक्षा णो मो वैश्वानरो वृषभो वचः प्राणः उदानोऽङ्ग इमा मे०** ......(वा० प्रा० 4.85) सूत्र में अङ्ग पद को भी प्रकृतिभाव दर्शाया है। काशिका के अनेक संस्करणों में जो उदाहरण प्रस्तुत सूत्र के दिये हैं उनमें बहुत भिन्नता है। कहीं-कहीं प्रदत्त उदाहरण में '**अशोचिषम्**' है कहीं-कही '**अरोचिषम्**'।।

वेदसंहिताओं में इस सूत्र के जो प्रयोग मिलते हैं, उन्हें हम नीचे दर्शाते हैं-

1. **अङ्गेअङ्गे**।।
   (क) **ऐन्द्रः प्राणो अङ्गेअङ्गे**।।
   मा० 6.20; का० 6.4.4; तै० 1.3.10.1; 6.3. 11.2; मै० 1.2.17; काठ० 3.7
   (ख) **दश प्राणा अङ्गेअङ्गे वै पुरुषस्य**।। मै० 1.11.6

वेदसंहिताओं में सर्वत्र एक ही पद की अनकेधा आवृत्ति हुई है।।

146. अनुदात्ते च कुधपरे।। अष्टा० 6.1.120

का०-यजुषीत्येव। अनुदात्ते चाति कवर्गधकारपरे परतो यजुषि विषय एङ् प्रकृत्या भवति। अयं नो अग्निः (मा० सं० 5.37)। अयं सो अध्वरः। अनुदात्त इति किम्? सोऽयमग्निः सहस्त्रियः (तु० मा० सं० 15.21)।।

सि०-कवर्गधकारपरे अनुदात्तेऽति परे एङ् प्रकृत्या यजुषि। अयं सो अग्निः (मा० 12.47)। अयं सो अध्वरः। अनुदात्ते किम्? अथोऽग्रे रुद्रे। अग्रशब्द आद्युदात्तः। कुधपरे किम्? सोऽयमग्निमन्तः।।

सूत्र में **यजुषि, प्रकृत्या, एङः**, अति, संहितायाम् की पूर्ववत् अनुवृत्ति आ रही है। यजुर्वेद विषय में कु= कवर्ग धकारपरक अनुदात्त अकार के परे रहते भी एङ् को प्रकृतिभाव होता है। **सो अग्निः**। अग्नि शब्द अनुदात्तादि है तथा अकार के परे कवर्ग 'ग्' है ही, अतः प्रकृतिभाव हो गया है। **अयं सो अध्वरः**। शब्द भी प्रातिपादिक स्वर से अन्तोदात्त है। अतः **'अनुदात्तं**० (अष्टा० 6.1.152) लगकर अनुदात्तादि है, अकार से परे धकार है ही, अतः प्रकृतिभाव हो गया। अनुदात्त परे रहते इसका क्या फल है? **अथोऽग्रे**। अग्र शब्द **'ऋज्रेन्दाग्नि'** (उणादि० 1.186) से आद्युदात्त निपातित है। अतः इसके परे रहते प्रकृतिभाव नहीं होता। कु=कवर्गपरक और धकार परक अ परे रहते-इसका क्या अभिप्राय है? **सोऽयमग्निः सो+अयम्**-यहाँ अ के बाद कवर्ग या धकार नहीं है। वास्तव में यहाँ **'अव्यादवद्यात्'**० (अष्टा० 8.1.116) में प्रदर्शित **शतधारो + अयं मणिः** के समान ही प्रकृतिभाव होना चाहिए। अतः कोई भिन्न प्रत्युदाहरण होना उचित था। नागेशभट्ट ने धकार में अकार उच्चारणार्थ माना है- **धकारे अकार उच्चारणार्थः**।।

प्रस्तुत सूत्र के अनेक उदाहरण यजुर्वेद में प्राप्त होते हैं-

1. **अग्निः**।।

   (क) **पुरीष्यासो अग्नयः प्रावणेभिः सजोषसः**।। मा० 12.50

(ख) ये अग्नयः समनसोऽन्तरा।।

मा० 14.6; 15; 16; 27; 15; 57;

(ग) ये अग्नयः पाञ्चजन्याः।। मा०18.67।।

(घ) अर्चद्धूमासो अग्नयः पावकाः।। मा० 33.1

ये अधिक प्रयोग कवर्ग परे रहते ही हैं, धकार परक अनुदात्त अकार के परे रहते यजुर्वेद में कोई प्रकृतिभाव का प्रयोग हमें नहीं मिला है।।

147. अवपथासि च।। अष्टा० 6.1.121

का०-यजुषीत्येव। अनुदात्त इति चशब्देनानुकृष्यते। अवपथाःशब्देऽनुदात्तेऽकारादौ परतो यजुषि विषय एङ् प्रकृत्या भवति त्री रुद्रेभ्यो अवपथाः। (काठ० सं० 30.6.32)। वपेर्लङि थासि 'तिङ्ङतिङः' (8.1.28) इति निघातेनानुदात्तत्वम्। अनुदात्त इत्येव- यद्रुद्रेभ्योऽवपथाः। 'निपातैर्यद्यदिहन्तः'० (8.1.130) इति निघातः प्रतिषिध्यते।।

सि०-अनुदात्ते अकारादौ अवपथाः शब्दे परतो यजुषि एङ् प्रकृत्या। त्रि रुद्रेभ्यो अवपथाः (काठ० सं० 30.6.32)। वपेस्थासि लङि 'तिङ्ङतिङः' (8.1.28) इत्यनुदात्तत्वम्। अनुदात्ते किम्? यद्रुद्रेभ्योऽवपथाः। 'निपातैर्यद्यदिहन्तः'० (8.1.130) इति निघातो न।।

इस सूत्र में 'अनुदात्ते च कुधपरे' (अष्य० 6.1.120) से 'अनुदात्ते' की तथा पूर्ववत् यजुषि, प्रकृत्या, एङः, अति, संहितायाम् इनकी अनुवृत्ति आ रही है। अवपथाः शब्द में भी जो अनुदात्त अकार उसके परे रहते यजुर्वेद विषय में एङ् को प्रकृतिभाव होता है। त्रि रुद्रेभ्यो अवपथाः। वप् धातु से लङ् लकार में थास् परे रहते अट् आगम होकर 'अवपथाः' सिद्ध हुआ। 'तिङ्ङतिङः' (अष्य० 8.1.28)से अतिङ् 'रुद्रेभ्यो' से उत्तर निघात होता है, अतः अनुदात्त अकार परे है। सो 'रुद्रेभ्यो' का ओकार प्रकृतिवत् रह गया, सन्धि नहीं हुई। चकार 'अनुदात्ते' पद के अनुकर्षणार्थ है। अनुदात्त रहने पर ही-यद् रुद्रेभ्योऽवपथाः में अर्थात् क्रियापद से पूर्व यदि यत् यदि हन्त,

कुवित् नेत्, चेत् चण् (चण से बोध्य है च-'यदि' अर्थ में) **कच्चित्** तथा यत्र निपात आवे तो '**निपातैर्यद्यदिहन्त०**' (अष्ट्या० 8.1.130) सूत्र से आख्यात पद अनुदात्त नहीं होता, उदात्त ही रहता है, अतः '**निपाताः आद्युदात्ताः**' (फिट् सू० 80) भी कहा गया है। निघात का अर्थ-उदात्त स्वर का अनुदात्त में परिवर्तन होना है।

'**अवपथाः**' पद का सूत्रानुसार कतिपय स्थलों पर प्रयोग हुआ है-

1. **अवपथाः।।**

(क) **त्रिर्वसुभ्यो अवपथास्त्री रुद्रेभ्यो अवपथास्त्रिरादित्येभ्यो अवपथा येन रूपेण प्रजापतयेऽवपथास्तेन मह्यं पवस्व।।**

काठ० 30.6

(ख) **त्रिर्वसुभ्यो अवपथा इति०।।** काठ० 30.7

148. सर्वत्र विभाषा गोः।। अष्टा० 6.1.122

का०-सर्वत्र छन्दसि भाषायां चाति परतो गोरेङ् प्रकृत्या भवति विभाषा। गोऽग्रम् गो अग्रम्। छन्दसि-अपशवो वा अन्ये गोअश्वेभ्यः पशवो गोअश्वान् (तै० सं० 5.2.9.4)।।

सर्वत्र= छन्द तथा भाषविषय दोनों में '**गो**' शब्द के पदान्त '**एङ्**' को विकल्प से अकार परे रहते प्रकृतिभाव होता है। प्रकृतिभाव पक्ष में **-गो+अग्रम् = गो अग्रम्।** पक्ष में पूर्वरूप-**गो+अग्रम्=गोऽग्रम्।** अग्रिम सूत्र '**अवङ् स्फोटायनस्य**' (अष्ट्या० 6.1.123) से अवङ् होने पर स्फोटयन आचार्य के मत में '**गवाग्रम्**' भी बनेगा। वेद में '**गो अश्वेभ्यः**'- में प्रकृतिभाव हुआ तथा '**गोश्वाः**' में पूर्वरूप। यद्यपि यह सूत्र भट्टोजिदीक्षित ने वैदिक प्रक्रिया में गृहीत नहीं किया, किन्तु इसमें वैदिक नियम होने से हमने इसका ग्रहण कर लिया है।।

वेदों से प्रस्तुत सूत्र के प्राप्त-प्रयोगों को हम दिखा रहें हैं-

प्रकृतिभाव पक्ष में

(क) **गोअग्रयाश्वावत्या रभेमहि।।**

ऋ० 1.53.5; काठ० 10.12

(ख) सं सुष्टुती नसते सं गोअग्रया।। ऋ० 9.71.8

(ग) गोअग्रयाश्वावत्या रभेमहि।। शौ० 20.21.5।।

(घ) उत नो धियो गोअग्राः।। ऋ० 1.90.5

(ङ) रदा मरुद्भिः शुरुधो गोअग्राः।। ऋ० 1.169.8।।

(च) उषो युवस्व गृणते गोअग्राः।। ऋ० 6.39.1

(छ) उषो गोअग्राँ उप मासि वाजान्।। ऋ० 1.92.7

(ज) ये स्तोतृभ्यो गोअग्रामश्वपेशसम्।।
ऋ० 2.1.16; 2.2.13

(झ) अप स्तेनं वासो गोअजमुत तस्करम्।। शौ० 19.50.5

(ञ) दण्डा इवेद् गोअजनास आसन्।। ऋ० 7.33.6

(ट) गोअर्घं यजमानं गोअर्घमध्वर्युम्।। तै० 6.1.10.1

(ठ) अग्रं गच्छथो विवरे गोअर्णसः।। ऋ० 1.112.18

(ड) गोअर्णसं रयिमिन्द्र श्रवाय्यम्।। ऋ० 10.38.2

(ढ) गोअर्णसि त्वाष्ट्रे अश्वनिर्णिजि।। ऋ० 10.76.3

(ण) गोअश्वानेवास्मै समीचो दधाति।। तै० 5.2.9.4

(त) प्राचीनमृषभस्य गोअश्वानेवास्मिन्।। काठ० 20.8

(थ) अन्ये गोअश्वेभ्यः पशवो गोअश्वानेवास्मै समीचो।।
तै० 5.2.9.4

पूर्वरूप पक्ष का 'गोऽग्रम्' जैसा उदाहरण वेदसंहिताओं में अनुपलब्ध हैं।।

149. आङोऽनुनासिकश्छन्दसि।। अष्टा० 6.1.126

का०-आङोऽचि परतः संहितायां छन्दसि विषयेऽनुनासिकादेशो भवति स च प्रकृत्या भवति। अभ्र आँ अपः (ऋ० 5.48.1)। गम्भीर आँ उग्रपुत्रे जिघांसतः (ऋ० 8.67.11)। केचिदाङोऽनुनासिकश्छन्दसि बहुलमित्यधीयते। तेनेह न भवति-इन्द्रो बाहुभ्यामातरत्। आ अतरत्।।

सि०-आङोऽचि परेऽनुनासिकः स्यात् स च प्रकृत्या। अभ्र आँ अपः (ऋ० 5.48.1)। गम्भीर आँ उग्रपुत्रे (ऋ० 8.67.11)।। ईषा

अक्षीदीनां छन्दसि प्रकृतिभावो वक्तव्यः।। ईषा अक्षो हिरण्ययः (ऋ० 8.5.29)। ज्या इयम् (ऋ० 6.75.3)। पूषा अविष्टु (ऋ० 10.26.9)।।

इस सूत्र में **'प्लुतप्रगृह्या अचि नित्यम्'** (अष्ट्या० 6.1.125) से **'अचि'** की तथा पूर्ववत् **प्रकृत्या, संहितायाम्**, की अनुवृत्ति आ रही है। आङ् को अच् परे रहते संहिता के विषय में अनुनासिक आदेश वेद विषय में बहुल करके होता है तथा उस अनुनासिक को प्रकृतिभाव भी होता है। बहुल ग्रहण से आङ् के अतिरिक्त भी अनुनासिक आदेश और प्रकृतिभाव दृष्टिगत होता है। कुछ लोग **'आङोऽनुनासिकश्छन्दसि बहुलम्'** ऐसा सूत्र पढ़ते हैं। अष्ट्याध्यायी प्रथमावृत्ति में भी **'बहुलम्'** का ग्रहण हुआ है। इसलिये यहाँ भी नहीं होता है– **इन्द्रो बाहुभ्यामातरत्।** बहुलग्रहण के कारण अनुनासिक नहीं हुआ। अतः प्रकृतिभाव भी नहीं होता है। दीर्घ हो जाता है। जहाँ **'आ'** अनर्थक है, वहीं अनुनासिक होता है। जैसे– **अभ्र आँ अपः।** परन्तु धातु के साथ उपसर्ग रूप में अर्थवान् हो जाता है। अतः वह न अनुनासिक होता है और न प्रकृति रूप से रहता है, दीर्घ हो जाता है। बहुल वचन के कारण अलग भी रह सकता है।

प्रस्तुत सूत्र पर भट्टोजिदीक्षित ने **'ईषा अक्षादीनां छन्दसि प्रकृतिभावो वक्तव्यः'** इस वार्तिक को अधिगृहीत कर वेद में **'ईषा अक्षः'** आदि पदों में प्रकृतिभाव माना है। यथा– **ईषा अक्षो हिरण्ययः।** प्रस्तुत उदाहरण में **ईषा + अक्षः = 'अकः सवर्णे दीर्घः'** से दीर्घ हो रहा था। किन्तु वार्तिक से प्रकृतिभाव हो गया। **ज्या + इयम्** – में **'आद्गुणः'** से गुण प्राप्त है, किन्तु इस वार्तिक से गुण का बाध और प्रकृतिभाव हो गया है।

वेदों में प्राप्त कतिपय प्रयोग उद्धृत हैं–

(क) **आमेन्यस्य रजसो यदभ्र आँ।।** ऋ० 5.48.1

(ख) **ज्या इयं समने पारयन्ती।।** ऋ० 6.75.3

(ग) **पर्षि दीने गभीर आँ उग्रपुत्रे जिघांसतः।।** ऋ० 8.67.11

(घ) **ईषा अक्षो हिरण्ययः।।** ऋ० 8.5.29।।

(ङ) **अस्माकमूर्जा रथं पूषा अविष्टु माहिनः।।** ऋ० 10.26.9

वेदसंहिताओं में इस सूत्र के अनेक प्रयोग हैं, हमने कतिपय ही दिखाये हैं।।

150. स्यश्छन्दसि बहुलम्।। अष्टा० 6.1.133

का०-स्य इत्येतस्य छन्दसि हलि परतो बहुलं सोर्लोपो भवति। उत स्य वाजी क्षिपणिं तुरण्यति ग्रीवायां बद्धो अपि कक्ष आसनि (ऋ० 4.404)। एष स्य ते पवत इन्द्र सोमः (ऋ० 9.97.46)। न च भवति- यत्र स्यो निपतेत्।।

सि०-स्य इत्यस्य सोर्लोपः स्याद् हलि। एष स्य भानुः (4.45.1)।।

इस सूत्र में **'एतत्तदोः सुलोपोऽकोरनञ्समासे हलि'** (अष्या० 6.1.1.32) से **'सुलोपः' 'हलिः'** की तथा पूर्ववत् **'संहितायाम्'** की अनुवृत्ति आ रही है। **'स्यः'** यह षष्ठी के अर्थ में प्रथमा है। **स्यः** शब्द के सु का वेदविषय में हल् परे रहते बहुल करके लोप हो जाता है, संहिता के विषय में। **उत स्य वाजी क्षिपणिं तुरण्यति। एष स्य ते पवत०।** यहाँ दोनों प्रयोगों में स्य=त्यत्+सु के सु का लोप हुआ है। 'तत्' का समानार्थक सर्वनाम 'त्यद्' है। 'त्यद्' का ही पुलिंग एकवचन में 'स्य' रूप होता है। 'त्यद्' शब्द से प्रथमा विभक्ति एकवचन में 'सु' इस सु के परे होने पर त्यद् के स्थान पर **'त्यादीनामः'** (अष्या० 6.2.102) से अकार आदेश, **'अलोऽन्त्यस्य'** (अष्या० 1.1.52) त्य+अ+सु **'अतो गुणे'** (अष्या० 6.1.97) से 'त्य' का अकार परवर्ती से अकार से मिल गया। त्य+सु, **'तदोः सः सावनन्त्ययोः'** (अष्या० 7.2.106) से सकार आदेश पुनः रुत्व, विसर्ग **'स्यः'** बना। इसी **'स्यः'** से परे व्यञ्जन वर्ण होने से सु का लोप इस सूत्र से वेद में होता है। लोक में इस सूत्र का पूर्ववर्ती सूत्र **'एतत्तदोः सुलोपोऽकोरनञ्समासे हलि** (अष्या० 6.1.132) करता है, जैसे **सः पठति, सः लिखति।** लोप होने पर **स गच्छति।** सुलोप नहीं भी होता-**यत्र स्यो निपतेत्।**

प्रस्तुत सूत्र के कतिपय प्रयोग वेदों में उपलब्ध हैं-

1. **अस्य।।**
   - (क) **अभूद्यः स्य दूतो न आजगन्।।** ऋ० 1.161.4
   - (ख) **उत स्य न इन्द्रो विश्वचर्षणिः।।** ऋ० 2.31.3
   - (ग) **उत स्य देवो भुवनस्य सक्षणिः।।** ऋ० 2.31.4

(घ) क्व स्य ते रुद्र मृळयाकुः।। ऋ० 2.33.7

(ङ) एष स्य ते तन्वो नृम्णवर्धनः।।

ऋ० 2.36.5; शौ० 20.67.6

(च) उत स्य वाजी सहुरिर्ऋतावा।। ऋ० 4.38.7

(छ) उत स्य वाजी क्षिपणिं तुरण्यति।।

ऋ० 4.40.4; मा० 9.14

(ज) एष स्य भानुरुदियर्ति युज्यते।। ऋ० 4.45.1

(झ) क्व स्य वीरः को अपश्यदिन्द्रम्।। ऋ० 5.30.1

(ञ) उत स्य वाज्यरुषः।। ऋ० 5.56.7

(ट) यद्ध स्य मानुषो जनः।। ऋ० 6.2.3

(ठ) उत स्य देवः सविता भगो नः।। ऋ० 6.50.13

(ड) अयमु ष्य सुमहाँ अवेदि।। ऋ० 7.23.3

(ढ) वि बाधिष्ट स्य रोदसी महित्वा।। ऋ० 7.23.3

(ण) एष स्य मित्रावरुणा नृचक्षाः।। ऋ० 7.60.2।।

(त) एष स्य वां पूर्वगत्वेव सख्ये।। ऋ० 7.67.7

(थ) एष स्य कारुर्जरते सूक्तैः।। ऋ० 7.68.9

(द) यो ह स्य वां रथिरा वस्त उस्राः।। ऋ० 7.69.5

(ध) उदु ष्य शरणे दिवः।। ऋ० 8.25.19

(न) उदु ष्य वः सविता सुप्रणीतयः।। ऋ० 8.27.12

(प) क्व1स्य वृषभो युवा।। ऋ० 8.64.7

(फ) एष उ स्य पुरुव्रतः।। ऋ० 9.3.10; कौ० 2.615

(ब) एष उ स्य वृषा रथः।। ऋ० 9.38.1; कौ० 2.624

(भ) एष स्य मानुषीष्वा।। ऋ० 9.38.4; कौ० 2.626

(म) एष स्य मद्यो रसः।। ऋ० 9.38.5।।

(य) एष स्य पीतये सुतः।। ऋ० 9.38.6; कौ० 2.628

(र) एष स्य परि षिच्यते।। ऋ० 9.62.13

(ल) एष स्य सोमः पवते।। ऋ० 9.84.4

(व) एष स्य ते मधुमाँ इन्द्र सोमः।।

ऋ० 9.87.4; कौ० 1.531

(स) प्रो स्य वह्निः पथ्याभिरस्यान्।। ऋ० 9.89.1

(श) एष स्य सोमो मतिभिः पुनानः।। ऋ० 9.96.15

(ष) एष स्य ते पवत इन्द्र सोमः।। ऋ० 9.97.46।।

(ह) परि ष्य सुवानो अव्ययम्।। ऋ० 9.98.2

(अ) एष स्य धारया सुतः।। ऋ० 9.108.5; कौ० 1.584

(आ) क्व1स्य पुल्वघो मृगः।। ऋ० 10.86.22

(इ) उत स्य न उशिजामुर्विया कविः।। ऋ० 10.92.12

(ई) अयमु ष्य प्र देवयुः।। ऋ० 10.176.3

(उ) एष स्य राथ्यो वृषा।। मा० 23.13

(ऊ) क्वा३स्य वृषभो युवा।। कौ० 1.142।।

(ए) परि स्य स्वानो अक्षरत्।। कौ० 2.590

(ऐ०) वि बाधिष्ट स्य रोदसी।। शौ० 20.12.3।।

(ओ०) क्व1स्य पुल्वघो मृगः।। शौ० 20.126.22

चारों वेदसंहिताओं में 'स्यः' शब्द के सु का हल् परे रहते लोप होने के ये पचास प्रयोग मिलते हैं। 'स्यः' शब्द के सु का हल् परे रहते बहुल करके लोप न हुआ हो, ऐसा कोई भी प्रयोग हमें नहीं मिला। अष्टाध्यायी के वृत्तिकारों ने भी जो 'सु' के लोप होने का उदाहरण दिया है, वह लौकिकप्रतीत होता है।।

151. ह्रस्वाच् चन्द्रोत्तरपदे मन्त्रे।। अष्टा० 6, 1, 151

का०-चन्द्रशब्द उत्तरपदे ह्रस्वात् परः सुडागमो भवति मन्त्रविषये। सुश्चन्द्र (ऋ० 5.6.5)। ह्रस्वादिति किम्? सूर्याचन्द्रमसाविव (ऋ० 5.51.15)। मन्त्र इति किम्? सुचन्द्रा। पौर्णमासी। उत्तरपदं समास एव भवतीति प्रसिद्धम्, तत इह न भवति-शुक्रमसि चन्द्रमसि (मा० सं० 4.18)।।

सि०-ह्रस्वात्परस्य चन्द्रशब्दस्योत्तरपदस्य सुडागमः स्यान्मन्त्रे। हरिश्चन्द्रो मरुद्गणः (ऋ० 9.66.26)। सुश्चन्द्र दस्म (ऋ० 5.6.5)।।

'सुट् कात् पूर्वः' (अष्टा० 6.1.1.31) से 'सुट्' की तथा पूर्ववत् संहितायाम् की अनुवृत्ति आ रही है। ह्रस्व से उत्तर चन्द्र शब्द उत्तरपद हो, तो

सुट् का आगम मन्त्रविषय में संहिता में होता है। उदा०–**सुश्चन्द्र**। '**स-चन्द्रः**' से प्रस्तुत सूत्र से सुट् आगम अनुबन्ध लोप, '**स्तोः श्चुना श्चुः**' (अष्या० 8.4.40) से श्चुत्व, **सुश्चन्द्रः**। इसी प्रकार **हरिश्चन्द्रः**। लोक में '**हरिश्चन्द्रः**' का '**प्रस्कण्वहरिचन्द्रावृषी**' (अष्या० 6.1.153) से ऋषि अर्थ में आचार्य ने निपातन किया है। काशिका के कतिपय संस्करणों में '**सुश्चन्द्र युष्मान्**' का स्थान संकेत (ऋ० 5.6.5) दिया है, जो गलत है। भट्टोजिदीक्षित ने सूत्रवृत्ति में '**चन्द्रोत्तरपदे**' पद के व्याख्यानार्थ '**चन्द्रशब्दस्य उत्तरपदस्य**' लिखा है, जिसका अर्थ है कि ह्रस्व के बाद सुट् होता है, यदि उत्तरपद में चन्द्र शब्द हो तो, तथा यह सुट् '**चन्द्र**' को ही होता है। ह्रस्व से परे–इसका क्या फल है? '**सूर्याचन्द्रमसाविव**'– यहाँ दीर्घ से परे '**चन्द्र**' पद है, अतः सुट् नहीं हो सकता। मन्त्र विषय में–इसका क्या अभिप्राय है? '**सुचन्द्रा पौर्णमासी**'–यह लौकिक वाक्य है। उत्तरपद पारिभाषिक रूप से समास में ही होता है, ऐसा प्रसिद्ध है, अतः '**शुक्रमसि चन्द्रमसि**'–इस '**मसि**' ह्रस्व पद के बाद होने पर भी परिभाषिक उत्तरपद नहीं है, सो सुट् नहीं हो सकता।

सूत्रानुसार हम वेदों में प्राप्त प्रयोगों को उपस्थापित कर रहे हैं–

1. **सुश्चन्द्रः।।**
वेदसंहिताओं में प्राप्त प्रयोग निम्न हैं-

1. **परिधापयित्वा।।**

    (क) **यजमानं परिधापयित्वान्वारम्भयित्वैतानि जुहोति।।**

    काठ० 11.10

2. **प्रत्यर्पयित्वा।।**

    (क) **प्रत्यर्पयित्वा प्रविद्वान्पन्थां विह्या विवेश।।** शौ० 12.2.55

    (ख) **प्रत्यञ्चम् अर्कं प्रत्यर्पयित्वा प्रविद्वान् पन्थां वि ह्य् आ चकार।।**

    पै० 17.35.4

3. **ग्राहयित्वा।।**

    (क) **भ्रातृव्यं ग्राहयित्वा विष्णुना यज्ञेन प्रणुदत।।**

    तै० 2.1.4.4; 5

    (ख) **वरुणेनैव भ्रातृव्यं ग्राहयित्वा ब्रह्मणास्तृणुते।।**

    तै० 2.1.8.2

    (ग) **तान् वै वरुणेनैव ग्राहयित्वा विष्णुना यज्ञेन प्राणुदत।।**

    मै० 2.5.3

    (घ) **यद्वारुणो वरुणेनैवैनं ग्राहयित्वा स्तृणुते।।**

    मै० 2.5.6; 11

4. **विर्वतयित्वा।।**

    (क) **यदुच्छिष्टे विवर्तयित्वा समिध आदधाति।।** मै० 1.6.12

5. समीरयित्वा।।
   (क) यावानेव पुरुषस्तं समीरयित्वा ऽयं वाव।। मै० 2.3.5
6. वर्धयित्वा।।
   (क) क्षेमे पशून् बहुलान् वर्धयित्वा।। पै० 4.27.2
7. शमयित्वा।।
   (क) एनं शमयित्वा परानभि निर्दिशति।। मै० 2.2.2.4
   (ख) अथो शमयित्वैवाशिषमाशास्ते।। मै० 3.2.2
   (ग) भागधेयेन शमयित्वाथ।। मै० 3.2.4
   (घ) सर्वा एव शुचश्शमयित्वा रुचमात्मन् धत्ते।। काठ० 7.6

इस सूत्र के सोलह प्रयोग वेदों में प्रयुक्त हुए हैं।।

186. सुपां सुलुक्पूर्वसवर्णाच्छेयाडाड्यायाजालः।। अष्टा० 7.1.39

का० - छन्दसि विषये सुपां स्थानं सु लुक् पूर्वसवर्ण आ आत् शे या डा ड्या याच् आल् इत्येत आदेशा भवन्ति। सु-अनृक्षरा ऋजवः सन्तु पन्थाः। (ऋ० 10.85.23)। पन्थान इति प्राप्ते। सुपां सुपो भवन्तीति वक्तव्यम्।। धुरि दक्षिणायाः। (ऋ० 1.16.4.9) दक्षिणायामिति प्राप्ते।। तिङां तिङो भवन्तीति वक्तव्यम्।। चषालं ये अश्वयूपाय तक्षति (ऋ० 1.126.6)। तक्षन्तीति प्राप्ते। लुक्- आर्द्रे चर्मन् (तै० सं० 7.5.9.3)। लोहिते चर्मन् (काठ० सं० 24.2)। चर्मणीति प्राप्ते। हविर्धाने यत् सुन्वन्ति तत् सामिधेनीरन्वाह। यस्मिन् सुन्वन्ति तस्मिन् सामिधेनीरिति प्राप्ते। पूर्वसवर्णः-धीती (ऋ० 1.164.8)। मती (ऋ० 1.82.2)। सुष्टुती (ऋ० 2.32.4)। धीत्या मत्या सुष्टुत्येति प्राप्ते। आ- द्वा यन्तारा (तै० सं० 4.6.9.3)। द्वौ यन्तारो इति प्राप्ते। आत्- न ताद् ब्राह्मणाद् निन्दामि। न तान् ब्राह्मणानिति प्राप्ते। शे -न युष्मे वाजबन्धवः। (ऋ० 8.68.19)। अस्मे इन्द्राबृहस्पती। (ऋ० 4.49.4)। यूयं वयमिति

प्राप्ते। यूयादेशो वयादेशश्च छान्दसत्वाद् न भवति। या उरुया (मै० सं० 2.7.8)। धृष्णुया (ऋ० 1.23.11)। उरुणा धृष्णुनेति प्राप्ते। डा- नाभां पृथिव्याम् (शौ० सं० 7.62.1)। नाभौ पृथिव्यामिति प्राप्ते। ड्या-अनुष्ट्या च्यावयतात्। अनुष्टुभेति प्राप्ते। याच्-साधुया (ऋ० 10.66.12)। साध्विति सोर्लुकि प्राप्ते। आल्-वसन्ता यजेत (मै० सं० 2.1.4)। वसन्त इति प्राप्ते।। इयाडियाजीकाराणामुपसंख्यानम्।। इया- उर्विया परि ख्यन् (ऋ० 10.10.2)। दार्विया परिज्मन्। उरुणा, दारुणेति प्राप्ते। डियाच्-सुक्षेत्रिया (ऋ० 1.97.2), सुगात्रिया। सुक्षेत्रिणा सुगात्रिणेति प्राप्ते। ईकारः-दृतिं न शुष्कं सरसी शयानम् (ऋ० 7.103.2)। सरसि शयानमिति प्राप्ते।। आङ्याजयारामुसंख्या- नम्।। आ (ङ) प्र बाहवा (ऋ० 2.38.2)। प्रबाहुनेति प्राप्ते। अयाच्- स्वप्नया सचसे जनम् (शौ० सं० 5.7.8)। स्वप्नेनेति प्राप्ते। अयार्-सिन्धुमिव नावया (ऋ० 1.97.8)। नावेति प्राप्ते।।

सि०-ऋजवः सन्तु पन्थाः (ऋ० 10.85.23)। पन्थान इति प्राप्ते सुः। परमे व्योमन् (ऋ० 1.129.7)। व्योमनीति प्राप्ते ङेर्लुक्। धीती मती सुष्टुती। धीत्या मत्या सुष्टुत्येति प्राप्ते पूर्वसर्वणदीर्घः। या सुरथा रथीततमोभा देवा दिविस्पृशा अश्विना (ऋ० 1.22.2)। यौ सुरथो रथीतमौ दिविस्पृशावित्यादौ प्राप्ते आ। नताद् ब्राह्मणम्। नतमिति प्राप्ते। आत् (या देव विद्म ता त्वा। यमिति प्राप्ते।) न युष्मे वाजबन्धवः (ऋ० 8.68.19)अस्मे इन्द्राबृहस्पती (ऋ० 4.48.4) युष्मासु अस्मभ्यमिति प्राप्ते शे। उरुया। धृष्णुया। उरुणा धृष्णुनेति प्राप्ते या। नाभा पृथिव्याः (ऋ० 1.143.4)। नाभौ इति प्राप्ते डा। ता अनुष्ठ्योच्च्यावयतात् (ऐ० बा० 2.6.15)। अनुष्ठानमनुष्ठा। व्यवस्थावदङ्। आङो ड्या। साधुया- साध्विति प्राप्ते याच्। वसन्ता यजेत। वसन्ते इति प्राप्ते आल्।। इयाडियाजीकाराणामुपसंख्यानम्।। उर्विया। दाविया। दार्विया। उरुणा, दारूणेति प्राप्ते इया। सुक्षेत्रिया।

सुक्षेत्रिणेति प्राप्ते डियाच्। दृतिं न शुष्कं सरसी शयानम् (ऋ० 7.103.2) ङेरीकार इत्याहुः। तत्राद्युदात्ते पदे प्राप्ते व्यत्ययेनान्तोदात्तता। वस्तुतस्तु ङीषन्तात् ङेर्लुक। इकारादेशस्य तूदाहरणान्तरं मृग्यम्।। आङयाजयारामुपसंख्यानम्।। प्र बाहवा सिसृतम् (ऋ० 2.38.2)। बाहुनेति प्राप्ते आङादेशः। 'घेर्ङिति' (7.3.111)। इति गुणः। स्वप्नया (शौ० सं० 5.7.8)। स्वप्नेनेति प्राप्तेऽयाच्। स नः सिन्धुमिव नावया (ऋ० 1.97.8)। नावेति प्राप्तेऽयार। रित्स्वरः।।

प्रस्तुत सूत्र में '**क्त्वापि छन्दसि**' (अष्टा० 7.1.38) से '**छन्दसि**' की अनुवृत्ति आ रही है। वेदविषय में सुपों के स्थान में सु, लुक्, पूर्वसवर्ण, आ, आत्, शे, या, डा ड्या, याच, आल, ये आदेश होते हैं। उदा०-**अनृक्षराः ऋजवः सन्तु पन्थाः**। यहा **पन्थानः** अपेक्षित है, '**पन्थाः**' में जस् (सुप्) के स्थान में 'सु' आदेश हो गया है। अतः बहुवचन में भी सु ही होता है।। सुपों के सुप् आदेश होते हैं। ऐसा कहना चाहिए।। **धुरि दक्षिणायाः**। यहां '**दक्षिणायाम्**' ऐसा सप्तमी विभक्ति का रूप प्राप्त था, किन्तु ङि के स्थान पर ङस् यह सुप् आदेश हो जाता है।। तिङ् आदेश होते है- ऐसा कहना चाहिए।। **चषालं ये अश्वयूपाय तक्षति**। यहाँ '**तक्षन्ति**' प्रथमपरुष बहुवचन ऐसा प्राप्त रहते '**झि**' के स्थान पर '**ति**' होता है।। **लुक्-आर्द्रे चर्मन्, लोहिते चर्मन्**। यहाँ '**चर्मणि**' ऐसा प्राप्त रहते 'ङि' का लुक् होता है। **हविर्धाने यत् सुन्वन्ति तत्सामिधेनीरन्वाह**। यहाँ '**यस्मिन् सुन्वन्ति**' और '**तस्मिन् सामिधेनीः**' ऐसा रूप प्राप्त रहते ङि का लुक् होता है। **पूर्वसवर्णदीर्घ-धीती। मती। सुष्टुती**। यहाँ तृतीया विभक्ति के एकवचन में टा = आ परे रहते **धीत्या, मत्या, सुष्टुत्या** रूप प्राप्त रहते यण् न होकर पूर्वसवर्णदीर्घ होता है। **आ-द्वा यन्तारा**। वस्तुतः यहाँ '**दौ यन्तारौ**' ऐसा रूप प्राप्त है। औ का आ आदेश करने पर उक्त रूप बनते हैं। **आत्- न ताद् ब्राह्मणाद् निन्दामि**। यहाँ '**तान् ब्राह्मणान्**' ऐसा रूप प्राप्त है, '**आत्**'- आदेश करने पर उक्त रूप बनता है। **शे- युष्मे वाजबान्धवः। अस्मे इन्द्राबृहस्पती**। यहाँ क्रमशः '**यूयम्**' मध्यमपुरुष बहुवचन '**वयम्**' उत्तम पुरुष बहुवचन (वस्तुतः यहाँ '**युष्मासु**' 'अस्मभ्यम्') रूप प्राप्त रहते युष्मे

अस्मे रूप होते हैं। इनमें 'जस्' सम्पूर्ण का आदेश करने के लिए 'शे' इसके शकार की इत्संज्ञा है। (टिलोप हो जाने पर युष्म + ए, अस्म + ए) छान्दस पद होने से यूयं वयं आदेश नहीं होते हैं। या- उरुया। **धृष्णुया** - यहाँ 'टा' के स्थान में याच् हुआ है। डा- **नाभा पृथिव्याम्**। नाभि शब्द से परे 'ङि' को 'डा' आदेश होकर **नाभा** बनता हैं। यहाँ **'नाभौ पृथिव्याम्'**- ऐसा रूप प्राप्त था।। ड्या- **अनुष्ट्योऽच्च्यावतात्**। अनुष्टुप् से परे 'टा' का ड्या आदेश एवं टिलोप होकर अनुष्ट्या बना है। यहाँ **'अनुष्टुभा'** ऐसा रूप प्राप्त था। **याच्- साधुया**। साधु शब्द से परे प्रथमा एकवचन सु को याच् आदेश होकर **साधुया** बना। यहां **'साधु'** शब्द प्राप्त है। **आल्- वसन्ता यजेत**। यहाँ **'वसन्ते'** ऐसा शब्द प्राप्त है। किन्तु 'ङि' के स्थान में आल् आदेश होकर **'वसन्ता'** रूप बना। इया तथा डियाच् और ईकार आदेश करना चाहिए। **उर्विया परिख्यन्। दर्विया**। ये दोनों **'इया'** के प्रयोग हैं। इनमें **'उरुणो' 'दारुणा'** इन रूपों के प्राप्त रहते **'इया'** आदेश।। **डियाच्- सुक्षेत्रिया। सुगात्रिया**। यहाँ **'सुक्षेत्रिणा' 'सुगात्रिणा'** रूप प्राप्त थे, किन्तु डियाच् आदेश। **ईकार-'दृतिं न शुष्कं सरसी शयानम्'** यहाँ **'सरसि'** रूप प्राप्त था, किन्तु इकार आदेश।। **आङ्, अयाच्** और **अयार** - का उपसंख्यान करना चाहिए।। **उदा०-आङ्- प्र बाहवा**। यहाँ **'प्र बाहुना'** रूप प्राप्त था, किन्तु टा का आङ् आदेश ङित् होने **'घेर्ङिति'** (अष्टा० 6.3.111) से 'उ' का गुण अवादेश **प्र बाहव् आ = प्र बाहवा। अयाच्-स्वप्नया सचसे जनम्**। यहाँ **'स्वप्नेन'** ऐसा रूप प्राप्त रहते अयाच् करने पर स्वप्न + अया, अ का **'अतो गुणे'** (अष्टा० 6.1.17) से पररूप। **अयार-सिन्धुमिव नावया**। यहां **'नवा'** ऐसा रूप प्राप्त है, टा का **'अयार'** नौ + अया, आव् आदेश होकर **नावया**।

वेदसंहिताओं में प्रस्तुत सूत्र के बहुशः प्रयोग प्राप्त होते हैं-

1. **पन्थाः।।**

   (क) **ये ते पन्थाः सवितः पूर्व्यासः**।। ऋ० 1.35.11

   (ख) **प्राणस्य पन्था अमृतो ग्रहाभ्याम्**।। मा० 19.90

   (ग) **यो देवयानः पन्थास्तेन यज्ञः**।। तै० 1.6.3.2

   (घ) **त्वं पन्था भवसि देवयानः**।। मै० 2.13.22

   (ङ) **यो देवयानः पन्थास्तेन गच्छ**।। काठ० 5.3

(च) सुगातो गातोत? स पन्थाः।। पै० 1.51.1

2. दक्षिणायाः।।

(क) पृथू रथो दक्षिणाया अयोज्य।। ऋ० 1.123.1

(ख) एतद्योनिमालब्ध दक्षिणायाश्चात्मानम्।। मै० 3.6.8

(ग) दक्षिणाया वै वृद्धिं यजमानोऽनुवर्धत।। काठ० 8.8

(घ) प्रियो दातुर्दक्षिणाया इह स्याम।। शौ० 6.58.1

(ङ) युक्ता मातासीद् धुरि दक्षिणायाः।। पै० 16.66.9

(च) प्रियो दातुर् दक्षिणायास् स्याम् अहम्।। पै० 19.10.6

प्रस्तुत सूत्र के अनेकशः प्रयोगवश हम इतने ही दिखा रहे हैं।।

187. अमो मश्।। अष्टा० 7.1.40

का०- अम् इति मिबादेशो गृह्यते। तस्य छन्दसि विषये मशादेशो भवति। वधीं वृत्रम् (ऋ० 1.165.8)। क्रमीं वृक्षस्य शाखाम्। लुङि 'बहुलं छन्दस्यमाङ्योगेऽपि' (6.4.75) इत्यडागमाभावः। शित्करणं सर्वदेशार्थम्। मकारस्यापि हि मकारवचनमनुस्वार निवृत्त्यर्थं स्यात्।।

सि०- मिबादेशस्यामो मश् स्यात्। अकार उच्चारणार्थः शित्त्वात्सर्वादेशः 'अस्तिसिचः'.....(7.3.96) इति ईट्। वधीं वृत्रम् (ऋ० 1.165.8)। 'अवधिषम्' इति प्राप्ते।।

इस सूत्र में 'छन्दसि' की अनुवृत्ति पूर्ववत् आ रही है। वेद-विषय में 'अम्' के स्थान में मश् आदेश होता है। 'तस्थस्थमिपां तान्तन्तामः' (अष्या० 3.4.101) से जो मिप् के स्थान में अम् आदेश होता है, उसी का यहाँ ग्रहण है। मश् में अकार उच्चारणार्थ है तथा शित्करण सर्वादेशार्थ 'अनेकाल्शित्सर्वस्य' (अष्या० 1.1.54) के लिये है। हन् + लुङ् (मिप् + अम्)। हन् को वध आदेश 'हनो वध लिङि' (अष्या० 2.4.42), 'लुङि च' (अष्या० 2.4.43) से हन् के स्थान पर हो गया। अट् + वध् + इट् + सिच् + ईट् + मश्। 'इट ईटि' (अष्या० 8.2.28) से स् का लोप 'बहुलं छन्दस्यमाङ्योगेऽपि' (अष्या० 6.4.75) से अट् का लोप होकर वध इ ई म् = वधीम्। लौकिक संस्कृत में

'**अवधिषम्**' बना क्योंकि वहाँ ईट् नहीं लगता वहाँ अम् रहता है, जो अपृक्त नहीं है। इसी प्रकार '**क्रमीम्**'। यह लुङ् उत्तम पुरुष का रूप है। शित् करना '**अनेकाल्शित्सर्वस्य**' (अष्टा० 1.1.54) से सम्पूर्ण का आदेश करने के लिये है। मकार का भी मकार आदेश करना अनुस्वार की निवृत्ति के लिये हो सकता है। अतः शित् आवश्यक है।।

वेदसंहिताओं में प्रस्तुत सूत्र के अनेक प्रयोग प्राप्त होते हैं, यथा-

1. **वधीम्**।।

 (क) **वधीं वृत्रं मरुत इन्द्रियेण**।।

 ऋ० 1.165.8; मै० 4.11.3; काठ० 9.18

2. **क्रमीम्**।।

 (क) **अन्यन्नद्ऽययो क्रमीम्**।। पै० 5.31.6

 (ख) **यस् त्वे ग ग यास्य क्रमीम्**।। पै० 20.59.3

188. लोपस्त आत्मनेपदेषु।। अष्टा० 7.1.40

का०- आत्मनेपदेषु यस्तकारस्तस्य छन्दसि विषये लोपो भवति। देवा अदुह्र (मै० सं० 4.2.13)। गन्धर्वाप्सरसो अदुह्र (मै० सं० 4.2.13)। अदुहतेति प्राप्ते। दुहामशिवभ्यां पयो अघ्न्येयम् (ऋ० 1.164.27)। दुग्धामिति प्राप्ते। दक्षिणतः पुमान् स्त्रियमुपशये (काठ० सं० 20.6)। शेत इति प्राप्ते। अपीत्यधिकाराद् न भवति - तत्र आत्मानमनृतं कुरुते। आत्मनेपदेष्विति किम्? उत्सं दुहन्ति कलशं चतुर्बिलम् (तै० ब्रा० 3.7.4.16)।।

सि०-छन्दसि। देवा अदुह्र (मै० सं० 4.2.13)। अदुहतेति प्राप्ते। दक्षिणतः ....शये (काठ०सं० 20.6)। शेते इति प्राप्ते। 'आत्मने'-इति किम्? उत्सं दुहन्ति (तै० ब्रा० 3.7.4.16)।।

पूर्ववत् इस सूत्र में '**छन्दसि**' की अनुवृत्ति आ रही है। आत्मनेपद का जो तकार उसका वेदविषय में लोप हो जाता है। **देवा अदुह्र। गन्धर्वाप्सरसो अदुह्र**''-इनमें '**अदुहत**' यह लोक में प्राप्त रूप था, वेद में '**अदुह्र**' हो गया।

दुह् + लङ्, अट्, अदादिगणीय होने से शप् का लुक् झ के स्थान पर **'आत्मनेपदेष्वनतः'** (अष्टा० 7.1.5) से 'अत्' आदेश। **'बहुलं छन्दसि'** (अष्टा० 7.1.8) से रूट् = र आगम-अदुह् र अत। 'त' का लोप करने पर दोनों अकारों का पररूप - **अदुह्र**। **'दुहामश्विभ्यां पयो अघ्न्येयम्'** - लोक में **'दुग्धाम्'** होता है, वेद में **'दुहाम्'** बना। दुह् लोट् = त, **'टित आत्मनेपदानां टेरे'** (अष्टा० 3.4.79) से टि का एत्व 'दुह् ते' आमेतः' (अष्टा० 3.4.90) से 'ए' का आम् दुह् त् आम्, त का लोप = दुहाम्। दक्षिणतः ..... उपशये। लोक में **उपशेते** यह रूप बनता है, किन्तु वेद में **'उपशये'**। शीङ् + लट् = त, टि का एत्व, ई का **'शीङः सार्वधातुके गुणः'** (अष्टा० 7.4.21) से गुण होकर, शे + ते, त् का लोप् शे + ए, ए का अय् आदेश = **शये** बना।। **'क्त्वापि छन्दसि'** (अष्टा० 7.1.38) से 'अपि' की अनुवृत्ति होने से लोप नहीं भी होता है, यथा-**'तत्र आत्मानमनृतं कुरुते'** यहाँ 'त्' का लोप नहीं हुआ है। आत्मनेपद प्रत्ययों में - इसका क्या फल है? **उत्सं दुहन्ति कलशं चतुर्बिलम्'** - यहाँ **'दुहन्ति'** परस्मैपद के 'त' का लोप नहीं होता है।

वेदों से प्रस्तुत सूत्र के कतिपय प्रयोग उद्धृत हैं-

1. **अदुह।।**
   (क) **यद्यदकामयत तत्तददुह।।** मै० 3.3.4
2. **अदुह्र।।**
   (क) **कामदुघाः काममदुह्र।।** मै० 3.3.4
   (ख) **पितरोऽदुह्र रजतेन पात्रेण।।** मै० 4.2.1।।
   (ग) **देवा अदुह्र हरितेन पात्रेण।।** मै० 4.2.13
3. **दुहाम्।।**
   (क) **दुहामश्विभ्यां पयो अघ्न्येयम्।।**
   ऋ० 1.164.27; शौ० 7.77.8
   (ख) **मह्यं स्तुतं दुहामा मा स्तुतस्य।।** तै० 3.2.7.1
   (ग) **सा नः पयस्वती दुहाम्।।** काठ० 39.10
   (घ) **सा न पयस्वती दुहाम्।।** पै० 2.22.5
   (ङ) **सहोऽस्मै दुहां शतधारम्।।** पै० 11.5.4

4. शये।।
   (क) शये शयासु प्रयुतो वनानु।। ऋ० 3.55.4
   (ख) दक्षिणतः शय एतद्वै यजमानस्य।। तै० 6.2.5.5
5. उपशये।।
   (क) यद्दक्षिणत उपशय उपशये।। तै० 6.6.4.4

189. ध्वमो ध्वात्।। अष्टा० 7.1.42

का०- छन्दसि विषये ध्वमो ध्वादित्ययमादेशो भवति। अन्तरेवोष्माणं वारयध्वात् (काठ० सं० 16.21)। वारयध्वमिति प्राप्ते।।

प्रस्तुत सूत्र में पूर्ववत् 'छन्दसि' की अनुवृत्ति आ रही है। ध्वम् के स्थान में ध्वात् आदेश वेद-विषय में होता है। **वारयध्वात्**। वृङ् अथवा वृञ् धातु से 'हेतुमति च' (अष्या० 3.1.26) से णिच् करके लोट् का **वारयध्वात्** रूप है। वारि शप् ध्वम् = गुण '**पुगन्तलघूपधस्य च**' (अष्या० 7.3.86) से हुआ है। अयादेश तथा प्रस्तुत सूत्र से ध्वम् के स्थान पर ध्वात् आदेश होकर '**वारयध्वात्**' बना। लोक में '**वारयध्वम्**' बनता है।

इस सूत्र का प्रयोग दो स्थलों पर हुआ है।

1. अन्तरेवोष्माणं वारयध्वात्।। काठ० 16.21; ऐ० ब्रा० 2.6.14

190. यजध्वैनमिति च।। अष्टा० 7, 1, 83

का०- यजध्वमित्येतस्य एनमित्येतस्मिन् परतो मकारलोपो निपात्यते वकारस्य च यकारः छन्दसि विषये।यजध्वैनं प्रियमेधाः (ऋ० 8.2.37)। यजध्वमेनमिति प्राप्ते।।

सि०- एनमित्यस्मिन्परे ध्वमोऽन्तलोपो निपात्यते। यजध्वैनं प्रियमेधाः (ऋ० 8.2.37)। 'वकारस्य यकारो निपात्यते' इति वृत्तिकारोक्तिः प्रामादिकी।।

प्रस्तुत सूत्र में 'छन्दसि' की अनुवृत्ति पूर्ववत् आ रही है। '**यजध्वैनम्**' यह शब्द भी वेद-विषय में निपातन किया जाता है। **यजध्वैनम्**। यजध्व + एनम् = 'वृद्धिरेचि' (अष्टा० 6.1.88) वृद्धि होकर **यजध्वैनम्**। यहाँ

'यजध्वमेनम्' प्राप्त है। 'मकार' का लोप हो गया। काशिकाकार ने लिखा है-**'मकारलोपो निपात्यते वकारस्य यकारः'** -'**म**' का लोप और '**व**' का '**य**' - ये दो कार्य निपातन से प्रस्तुत सूत्र से होते है। इस चिन्तन से काशिकाकार के मत में '**यजध्यैनमिति च**' सूत्र होना चाहिये। पदमञ्जरीकार केवल 'म' लोप निपातन को ही मानते है। भट्टोजिदीक्षित ने लिखा- '**वकारस्य यकारो निपात्यते इति वृत्तिकारोक्तिः प्रामादिकी**' अर्थात् काशिकाकार का कथन प्रमाद युक्त है, यतोहि '**व**' का यकार आदेश कहीं प्राप्त नहीं हुआ है। कौमुदी के सुबोधिनी व्याख्याकार जयकृष्णमौनि ने भी काशिकाकार के वचन को दूषित बताया- '**वृत्तिकारस्तु**' '**यजध्यैनमिति पाठं ज्ञात्वा वकारस्य यकारश्च निपात्यत इत्याह। तद्दूषयति-वकारस्येत्यादि। प्रामादिकीति। लक्ष्ये वकारपाठस्य निर्विवादत्वात्, वेदभाष्येऽपि प्रकृतसूत्रस्य मलोपमात्र परतोक्तेश्चेति भावः।।**

वेदसंहिताओं में प्रस्तुत सूत्र का मात्र एक ही प्रयोग प्राप्त होता है-

1. यजध्वैनम्।।

   (क) यजध्वैनं प्रियमेधा इन्द्रं सत्राचा मनसा।। ऋ० 8.2.37

191. तस्य तात्।। अष्टा० 7.1.44

का०- तशब्दस्य लोण्मध्यमपुरुषबहुवचनस्य स्थाने तादित्ययमादेशो भवति। गात्रं गात्रमस्यानूनं कृणुतात् (मै० सं० 4.13.4)। कृणुतेति प्राप्ते। ऊवध्यगोहं पार्थिवं खनतात् (मै०सं० 4.13.4) खनतेति प्राप्ते। अस्ना रक्षः संसृजतात् (मै० सं० 4.13.4)। संसृजतेति प्राप्ते। सूर्यं चक्षुर्गमयतात् (मै० सं० 4.13.4)। गमयतेति प्राप्ते।।

सि०-लोटो मध्यमपुरुषबहुवचनस्य स्थाने तात्स्यात्। गात्रमस्यानूनं कृणुतात् (मै० सं० 4.13.4)। कृणुतेति प्राप्ते। सूर्यं चक्षुर्गमयतात् (मै० सं० 4.13.4)। गमयतेति प्राप्ते।

प्रस्तुत सूत्र में '**छन्दसि**' की अनुवृत्ति पूर्ववत् आ रही है। 'त' से यहाँ लोट् के मध्यम पुरुष में जो '**तस्थस्थमिपां तान्तन्तामः**' (अष्टा० 3.4.101) से किया हुआ त आदेश है वह लिया गया है। एवं अर्थ होगा- वेद-विषय में

लोट् मध्यमपुरुष बहुचन का जो त उसके स्थान में तात् आदेश होता है। कृणुतात्। यहाँ '**कृणुत**' यह प्राप्त है, उसके स्थान पर वेद में '**कृणुतात्**' बना। भ्वादिगण में कृवि धातु हिंसा और करण अर्थ में पठित है। इसमें इकार की इत्संज्ञा होने से '**इदितो नुम् धातो**' (अष्या० 7.1.58) से नुम् का आगम अन्तिम अच् (कृव् में ऋ) के बाद होगा। तब कृन्व् ऐसा बनकर ऋ के बाद न् का ण् '**रषाभ्यां नो णः समानपदे**' (अष्टा० 8.4.1) से होकर '**धिन्विकृण्व्योर च**' (अष्टा० 3.1.80) से '**उ**' प्रत्यय तथा वकार का अकार आदेश, यह '**शप्**' का अपवाद है। '**अतो लोपः**' (अष्टा० 6.4.48) से अ लोप होकर **कृणुतात्** बना। लोक में **तात्** आदेश न होने से '**कृणुत**' बनेगा। खनतात्। लोक में तात् न होने '**खनत**'। **संसृजतात्**। लोक में '**संसृजत**'। 'गमयतात्'। लोक में 'गमयत' बनेगा।

प्रस्तुत सूत्र के वेदों में अनेकशः प्रयोग प्राप्त होते हैं–

1. **कृणुतात्**।।

   (क) **यदागच्छात् पथिभिर्देवयानैरिष्टापूर्ते कृणुतादाविरस्मै**।।
   तै० 5.7.7.2

   (ख) **गात्रं गात्रमस्यानूनं कृणुतात्**।। मै० 4.13.4।।

   (ग) **अस्य पदः कृणुतात्**।। काठ० 16.21

   (घ) **गात्रमस्यानूनं कृणुतात्**।। काठ० 16.21

   (ङ) **इष्टापूर्तं कृणुतादाविरस्मै**।। काठ० 40.13

2. **खनतात्**।।

   (क) **ऊवध्यगोहं पार्थिवं खनतात्**।।
   मै० 4.13.4; काठ० 16.21

3. **गमयतात्**।।

   (क) **सूर्यं चक्षुर्गमयताद्**।। मै० 4.13.4; काठ० 16.21

4. **आवहतात्**।।

   (क) **नासत्यावब्रुवन्देवाः पुनरा वहतादिति**।। ऋ० 10.24.5

   (ख) **तेन माम ब्रवीद्भगो जायमा वहतादिति**।। शौ० 6.82.2

5. वारयतात्।।
   (क) अन्तरेवोष्माणं वारयतात्।। मै० 4.13.4
6. वारयतात्/दूषयतात्।।
   (क) विषं वारयताद् इति विषं दूषयताद् इति।। पै० 4.21.7
   (ख) विषं वाययताद् इति विषं दूषयताद् इति।। पै० 19.23.7
7. संसृजतात्।।
   (क) अस्ना रक्षः संसृजतात्।। मै० 4.13.4
   (ख) अस्ना रक्षस्सं सृजतात्।। काठ० 16.21
8. ब्रूतात्।।
   (क) सुभृतकर्म देवेषु नः सुकृतो ब्रूतात्।। तै० 1.4.45.3
   (ख) ते अघ्नियेनामानि सुकृतं मा देवेषु ब्रूतादिति......।।
   तै० 7.1.6.8

192. तप्तनप्तनथनाश्च।। अष्टा० 7.1.45

का०- तस्येति वर्तते। छन्दसि विषये तस्य, स्थाने तप् तनप् तन थन इत्येत आदेशा भवन्ति। तप्- शृणोत ग्रावाणः (तै० स० 1.3.13.1)। शृणुतेति प्राप्ते। सुनोता (ऋ० 7.32.8)। सुनुतेति प्राप्ते। तनप्- सं वरत्रा दधातन (ऋ० 10.101.5)। धत्तेति प्राप्ते। तन-जुजुष्टन (ऋ० 4.36.7)। जुषतेति प्राप्ते। छान्दसत्वात् श्लुः। थन-यदिष्ठन। यदिच्छतेति प्राप्ते। पित्करणमङित्त्वार्थम्।।

सि०- तस्येत्येव। शृणोत् ग्रावाणः (तै० सं० 1.3.13.1)। शृणुतेति प्राप्ते तप्। सुनोतन पचत ब्रह्मवाहसे (ऋ० 5.34.1)। दधातन द्रविणं चित्रमस्मे। तनप्। मरुतस्तज्जुजुष्टन (ऋ० 7.59.9)। जुषध्वमिति प्राप्ते व्यत्ययेन परस्मैपदं श्लुश्च। विश्वे देवासो मरुतो यतिष्ठन। यत्संख्याकाः।। स्थेत्यर्थः। यच्छब्दाच्छान्दसोऽतिः। अस्तेस्तस्य थनादेशः।।

प्रस्तुत सूत्र में **'तस्य तात्'** (अष्टा० 7.1.44) से **'तस्य'** की तथा पूर्ववत् **'छन्दसि'** की अनुवृत्ति आ रही है। वेद-विषय में **त** के स्थान में **तप्, तनप्, तन, थन**, ये आदेश भी होते हैं। **'त'** से यहाँ भी पूर्ववत् लोट् मध्यम पुरुष बहुवचन का ग्रहण किया गया है। **'शृणोत'**। शृणुत के स्थान पर हुआ है। **शृणोत** में **'श्रुवः शृ च'** (अष्टा० 3.1.74) से **'श्नु'** प्रत्यय, एवं शृ आदेश हुआ है। तप् के पित् होने से **'सार्वधातुकार्धधातुकयोः'** (अष्टा० 1.2.4) से ङितवत् न होने से गुण हो गया है। सुनोत में **'श्नु' 'स्वादिभ्यःश्नु'** (अष्टा० 3.1.73) से विकरण हुआ है। लोक में **सुनुत**। **तनप्-दधातन**। **धत्त**- इसके प्राप्त रहते धा + लोट् = त, जुहोत्यादिगणी होने से शप् का श्लु, द्वित्व, अभ्यास कार्य, दधा + त, त का तनप् पित् आदेश करने से ङित् न होने के कारण **'श्नाभ्यस्तयोरातः'** (अष्टा० 6.4.112) सूत्र से 'आ' का लोप नहीं होता है। लोक में 'त' ङित् होने से आ लोप्-दध् + त, **'दधस्तथोश्च'** (अष्टा० 8.2.38) से अभ्यास दकार का धकार आदेश धध् + त, **'झलां जश् झशि'** (अष्टा० 8.4.53) से ध् का द् **'खरि च'** (अष्टा० 8.4.55) से द् का **'त' धत्त। तन-जुजुष्टन। जुषत (जुषध्वम्)** - ऐसा प्राप्त होने पर वेद में श्लु होता है। व्यत्यय से परस्मैपद, जुष् + लोट् = थ = त, तुदादिगणी होने से 'श' इसका **'बहुलं छन्दसि'** (अष्टा० 2.4.76) से 'श्लु' आदेश। पुनः द्वित्व एवं तन आदेश होकर ष्टुत्व हुआ है। लोक में **'जुषध्वम्'** प्राप्त है, जुष धातु आत्मनेपदी होने से। **थन-यदिष्ठन। यदिच्छत** - ऐसा प्राप्त था, इष् धातु तुदादिगणी है, इष् + लोट् = थ = त, श का लुक्, इष् + त, 'त' का थन, पुनः **ष्टुत्व = इष्ठन**। इनमें पित् करना-अङित्त्व के सम्पादन के लिये है। अतः गुण निषेध न होकर गुण ही होता है।

वेदसंहिताओं में प्रस्तुत सूत्र के अनेकशः प्राप्त प्रयोग निम्न हैं, यथा-

1. **शृणोत।।**

   (क) **शृणोत ग्रावाणो विदुषः।।** तै० 1.3.13.1।।

   (ख) **तृष्टदंश्मा? शृणोत नः।।** पै० 19.20.7

2. **सुनोता।।**

   (क) **सुनोता मधुमत्तमम्।।** ऋ० 9.30.6।।

(ख) सुनोता सोमपावने।। पै० 19.1.5

3. दधातन।।

(क) दधातन द्रविणं चित्रमस्मे।। ऋ० 10.36.13

(ख) श्रदस्मै नरो वचसे दधातन्।। मा० 8.5

(ग) रयिं सर्ववीरं दधातन।। तै० 2.6.12.2

(घ) त न उर्जे दधातन।। पै० 19.45.8

4. जुजुष्टन।।

(क) स्तोमो वाजा ऋभवस्तं जुजुष्टन।। ऋ० 4.36.7

(ख) हविर्मरुतस्तज्जुजुष्टन।।

ऋ० 7.59.9; तै० 4.3.13.3; काठ० 21.13

5. सुनोतन।।

(क) सुनोतन पचत ब्रह्मवाहसे।। ऋ० 5.34.1

193. इदन्तो मसि।। अष्टा० 7.1.46

का०- छन्दसि विषये मसीत्ययं शब्द इकारान्तो भवति। मसः सकारान्तस्य इकारागमो भवति, स च तस्यान्तो भवति। तद्ग्रहणेन गृह्यत इत्यर्थः। पुनस्त्वोद् दीपयामसि (शौ० सं० 12.2.5)। उद्दीपयाम इति प्राप्ते। शलभान् भञ्जयामसि (पै० सं० 5.20.4)। भञ्जयाम इति प्राप्ते। त्वयि रात्रि वसामसि (शौ० सं० 19.47.9)। वसाम इति प्राप्ते।।

सि०-मसीत्यविभक्तिको निर्देशः। इकार उच्चारणार्थः। 'मस्' इत्ययमिकाररूपचरमावयवविशिष्टः स्यात्। मस इगागमः स्मादिति यावत्। नमो भरन्त एमसि (ऋ० 1.1.7)। त्वमस्माकं तव स्मसि (ऋ० 8.92.32)। इमः, स्मः, इति प्राप्ते।।

प्रस्तुत सूत्र में पूर्ववत् 'छन्दसि' की अनुवृत्ति आ रही है। मस् (सकारान्त शब्द) इत् = इकार अन्त = अवयववाला वेदविषय में हो जाता है अर्थात् मस् को इकार का आगम होता और वह अन्त को होता है। उसके ग्रहण से गृहीत होता है- यह अर्थ है। उदा०-दीपयामसि। लोक में दीपयामः। उत्पूर्वक

'दीपि' णिजन्त से लट्=मस्, उद् दीपि+मस्, शप्, गुण, अय आदेश उद्दीपय + मस् 'अतो दीर्घो यञि' (अष्टा० 7.3.101) से दीर्घ। प्रस्तुत सूत्र से इकार अन्त में आगम हुआ - उद्दीपयामसि। भञ्जयामसि। लोक में भञ्जयामः। वसामसि। वसामः लोक में होता है। भट्टोजिदीक्षित ने कहा है कि लोक में इमः, स्मः होगें।

इस सूत्र के वेदसंहितओं में अनेकशः प्रयोग हैं, यथा-

1. आ इ- आ इमसि एमसि।।

(क) नमो भरन्त एमसि।।

ऋ० 1.1.7; मा० 3.22; का० 3.3.14.तै० 1.5.6.2; कौ० 1.14

(ख) नमो भरन्ता एमसि।। मै० 1.5.3

(ग) नमो भरन्त एमसि।। काठ० 7.1; जै० 1.2.4

(घ) वयं नमो भरन्त एमसीति।। काठ० 7.8

2. क्लृप-कल्पयामसि।।

(क) आक्लान्तं संक्लान्तं स्नाव तकु? ते कल्पयामसि।।

पै० 11.2.7

3. गम्-गमयामसि।।

(क) परमेव परावक्तं सपत्नी गमयामसि।। ऋ० 10.45.4

(ख) परामेव परावतं सपत्नी गमयामसि।। शौ० 3.18.3

(ग) यतो न पुनर् आयासि तत्र त्वा गमयामसि।।

पै० 19.13.17

4. खन्-खनामसि।।

(क) इयं वीरुन्मधुजाता मधुना त्वा खनामसि।। शौ० 1.34.1

(ख) तां त्वा वयं खनामस्योषधिं शेपहर्षणीम्।। शौ० 4.4.1

(ग) तां त्वा निपत्नि केशेभ्यो दृंहणाय खनामसि।।

शौ० 6.136.1

(घ) मा ते रिषन् खनिता यस्मै च त्वा खनामसि।। पै० 1.65.3

(ङ) वृषणे त्वा खनामसि।। पै० 4.5.2

(च) यस्मै च त्वा खनामसि।। पै० 9.3.2

5. गृं-गृणीमसि।।

(क) रुद्रस्य सूनुं हवसा गृणीमसि।। ऋ० 1.64.12

(ख) तं ते मदं गृणीमसि।।

ऋ० 8.15.4; कौ० 1.383.2.880; जै० 1.43.3; शौ० 20.61.1

(घ) अग्निं द्वेषो योतवै नो गृणीमसि।। जै० 4:14.9

(ङ) सखा सखिभ्यस्तमिदं गृणीमसि।। शौ० 20.21.2

(छ) तत्तदिदस्य पौंस्यं गृणीमसि।। शौ० 20.73.6

(ज) प्रियं ते नाम सहुरे गृणीमसि।। पै० 4.12.5

6. वस्-वासयामसि।।

(क) तं गीर्भिर्वाचमीङ्ख्यं पुनानं वासयामसि।। ऋ० 9.35.5

7. वस्-वसामसि।।

(क) त्वयि रात्रि वसामसि स्वपिप्यामसि जागृहि।।

शौ० 19.47.9

8. वन-वानयामसि।।

(क) तृतीयम् अश्विनोर् वचस् तेन गां वानयामसि।।

पै० 19.26.10

9. वृत्-वर्तयामसि।।

(क) ये वातस्य प्रफर्वणि तेभिष्टं वर्तयामसि।। पै० 19.2.12

10. वृध-वर्धयामसि।।

(क) ऋचस्तमग्निं वर्धयामसि।। ऋ० 1.36.11

(ख) घृतेन वर्धयामसि।।

ऋ० 6.16.11; मा० 3.3 का० 3.1.3; कौ० 2.661; जै० 3.2.2

(ग) इध्मेन त्वा जातवेदः समिधा वर्धयामसि।। शौ० 19.64.2

11. उत् दीपयामसि (उत दीप्)।।

(क) तत् तव पुनस्त्वोद्दीपयामसि।।

तै० 1.5.3.2; मै० 1.7.1; का० 8.14; 12.2.5

(ख) यत्त्वा क्रुद्धः परोवयेत्याहापह्नुत एवास्मै तत् पुनस्त्वो-द्दीपयामसीति।। तै० 1.5.4.2

12. यजामसि।।

(क) ता वां मित्रावरुणा धारयत्क्षिती सुषुम्नेषितत्वता यजा-मसि।।

ऋ० 10.132.2

(ख) पितुभृतो न तन्तुमित्सुदानवः प्रति दध्मो यजामसि।।

ऋ० 10.172.2

13. उप स्पृश (उपस्पृशामसि)।।

(क) ताभ्यां त्वोप स्पृशामसि।। ऋ० 10.137.7

14. भरामसि।।

(क) तद्देवेभ्यो भरामसि।।

मा० 12.104; का० 13.7.3; तै० 4.2.7.1; मै० 2.7.14; काठ०16.14; पै० 15.2.7

(ख) वधुमिव त्वा शाले यत्रकामं भरामसि।।

शौ० 9.3.24; पै० 16.41.2

194. क्त्वो यक्।। अष्टा० 7.1.44

का० - क्त्वा इत्येतस्य यगागमो भवति छन्दसि विषये। दत्त्वाय (ऋ० 10.85.33) सविता धियः। दत्त्वेति प्राप्ते। 'क्त्वापिच्छन्दसि' (7.1.38) इत्यस्यानन्तरमिदं कस्माद् नोच्यते? समास इति तत्रानुवर्तते।।

सि०- दिवं सुपर्णो गत्वाय (ऋ० 8.100.8)।।

इस सूत्र में 'छन्दसि' की अनुवृत्ति आ रही है। क्त्वा को यक् आगम

होता है वेद विषय में। **दत्त्वाय।** **दत्त्वा**, यहां **'आद्यन्तौ टकितौ'** (अष्य० 1.1.45) से अन्त में यक् आगम होकर दत्त्वाय बना। लोक में दत्त्वा बनता है। **'क्त्वापि छन्दसि'** (अष्य० 7.1.38) के बाद ही इस सूत्र को क्यों नहीं कहा? उस सूत्र में **'समासे'** की अनुवृत्ति होती है। वह इस सूत्र में भी सम्भव होने पर केवल समास में ही यह आगम हो पाता है। इसी प्रकार गत्वा + यक् = गत्वाय।।

प्रस्तुत सूत्र के वेदों में कतिपय प्रयोगों को हम दिखा रहे हैं-

1. कृत्वाय।।

(क) **कृत्वाय सा महीमुखाम्।।**

मा० 12.59; का० 12.5.10; तै० 4.1.5.4; तै० 2.9.6; काठ० 15.5; 16.6

(ख) **अपराञ्चं प्र हिणोमि नम कृत्वाय तक्मने।।**

पै० 13.1.5

2. गत्वाय।।

(क) **दिवं सुपर्णो गत्वाय।।** ऋ० 8.100.8

(ख) **सूर्यो दिवमिव गत्वाय।।** शौ० 20.128.5

3. जग्ध्वाय।।

(क) **स्वादोः फलस्य जग्ध्वाय यथाकामं निपद्यते।।**

ऋ० 10.146.5

4. तत्त्वाय।।

(क) **युञ्जानः प्रथमं मनस्तत्त्वाय सविता धियः।।**

मा० 11.1; का० 12.1.2; तै० 4.1.1.1; मै० 2.7.1; काठ० 15.11

5. दत्त्वाय।।

(क) **सौभाग्यमस्यै दत्वायाथास्तं वि परेतन।।** ऋ० 10.85.33

(ख) **दत्त्वायास्मभ्यं द्रविणेह भद्रम्।।** काठ० 5.3; 9.6

6. दृष्ट्वाय।।

(क) **स्त्रियं दृष्ट्वाय कितवम्।।** ऋ० 10.34.11

7. वृत्वाय।।

(क) भूम्या वृत्वाय नो ब्रूहि यतः खनेम तं वयम्।। मा० 11.19

(ख) भूमेर्वृत्वाय नो ब्रूहि।।

का० 12.2.8; तै० 4.1.2.3; मै० 2.7.2;
का० 16.2

8. हित्वाय।।

(क) हित्वायावद्यं पुनरस्तमेहि सं गच्छस्व तन्वा सुवर्चाः।।

ऋ० 10.14.8

9. हत्वाय।।

(क) हत्वाय शत्रून्वि भजस्व वेद।।

ऋ० 10.84.2; शौ० 4.31.2

(ख) हत्वाय देवा असुरान्यदायन्।।

ऋ० 10.15.4; शौ० 20.63.2; 20.125.5

195. इष्ट्वीनमिति च।। अष्टा० 7.1.48

का०- इष्ट्वीनमित्ययं शब्दो निपात्यते छन्दसि विषये। यजेःक्त्वा-प्रत्ययान्तस्य ईनमादेशोऽन्त्यस्य निपात्यते। इष्ट्वीनं देवान्। इष्ट्वा देवानिति प्राप्ते। पीत्वीनमित्यपीष्यते। चकारस्यानुत्तफ-समुच्चयापर्थत्वात् सिद्धम्।।

सि०- क्त्वाप्रत्ययस्य ईनमन्तादेशो निपात्यते। इष्ट्वीनं देवान्। इष्ट्वा इति प्राप्ते।।

प्रस्तुत सूत्र में 'छन्दसि' की पूर्ववत् अनुवृत्ति आ रही है। इष्ट्वीनम् यह क्त्वा प्रत्ययान्त शब्द भी वेद विषय में निपातन किया जाता है। इष्ट्वीनम्। यज + क्त्वा (ईनम्) 'वचिस्वपियजादीनां किति' (अष्य० 6.1.15) से सम्प्रसारण तथा 'व्रश्चभ्रस्जसृजमृजयजराजभ्राजच्छशां षः' (अष्टा० 8.2.36) से ज के स्थान में ष्- इष् त्वीनम्- 'ष्टुना ष्टुः' (अष्य० 8.4.41) से त् का ट-इष्टवीनम्। लोक में इष्ट्वा रूप बनता।।'पीत्वीनम्' यह भी इष्ट

है। सूत्र में चकार अनुक्त के समुच्चय के लिए है इस कारण **'पीत्वीनम्'** यह भी सिद्ध है। अतिरिक्त वचन की आवश्यकता नही है।

सूत्रकार का अभिप्राय वेदविषय में **'इष्टवीनम्'** पद निपातन से सिद्ध करना है। यतोहि लोक में **'इष्ट्वा'** रूप क्त्वा प्रत्ययान्त बनता है। किन्तु अन्वेषणोपरान्त ज्ञात हुआ कि प्राप्त वेदसंहिताओं में क्वचिदपि **'इष्टवीनम्'** पद का प्रयोग ही नहीं हुआ है। हाँ, **'इष्ट्वा'** पद तै० 1.7.6.7; 2.5.6.1; 2. 6.1.6; 3.2.7.3; 3.4.1.4; 6.1.5.2; 6.1.5.3; काठ० 11.2; 12.6; 35.18; 36.3; क० 48.16; शौ० 9.9.2; 4; 6; 8; 12.2.54; पै० 16.114.1-4; 120.2; 17.35.2;- इन स्थलों पर अवश्य प्रयुक्त हुआ है। सम्भव है विलुप्त संहिताओं में यह सूत्र कार्य करता हो, जो आचार्य के समय विद्यमान रही होगीं।।

196. स्नात्व्यादयश्च।। अष्टा० 7.1.49

का०- स्नात्वी इत्येवमादयः शब्दा निपात्यन्ते छन्दसि विषये। स्नात्वी मंलादिव (मै० सं० 3.11.10)। स्नात्वेति प्राप्ते। पीत्वी सोमस्य वावृधे (ऋ० 3.40.7)। पीत्वेति प्राप्ते। प्रकारार्थोऽयमादिशब्दः।।

सि०- आदिशब्दः प्रकारार्थः। आकारस्य ईकारो निपात्यते। स्विन्नः स्नात्वी मलादिव (मै० 3.11.10)। पीत्वी सोमस्य वावृधे (ऋ० 3.40.7)। स्नात्वा पीत्वा इति प्राप्ते।।

प्रस्तुत सूत्र में पूर्ववत् **'छन्दसि'** की अनुवृत्ति आ रही है। वेद-विषय में **स्नात्वी** आदि शब्द भी निपातन किये जाते हैं। ईकार अन्तादेश ही यहाँ निपातन है। उदा०- **स्नात्वी**। **स्नात्वा** रूप प्राप्त होने पर यहाँ आ का ईकार आदेश किये जाने से **'स्नात्वी'** पीत्वी आदि रूप बने। यहाँ **'आदि'** यह शब्द प्रकारवाची है। इसका अभिप्राय है कि इस प्रकार के जो भी शब्दरूप वेदों में मिलेगें, उन्हें इसी सूत्र के द्वारा ईत्व करना चाहिए। लोक में **स्नात्वा, पीत्वा** रूप बनेगें।

वेदों में ऐसे पद अनेक प्राप्त हैं, हम कतिपय उद्धृत कर रहे हैं-

1. कृत्वी।।
   (क) भ्रातरनु वः कृत्व्येमसि।। ऋ० 1.161.3
   (ख) अवाडषव्यानि सुरभीणि कृत्वी।। ऋ० 10.15.12
   (ग) अपागूहन्नमृतां मर्त्येभ्यः कृत्वी।। ऋ० 10.17.2
   (घ) पुनर्दाय ब्रह्मजायां कृत्वी।। ऋ० 10.109.7
   (ङ) येनेन्द्रो हविषा कृत्वी।। ऋ० 10.159.4.174.4
   (च) कव्यवाहनावाड्ढव्यानि सुरभीणि कृत्वी।। मा० 19.66
   (छ) इव कृत्वी करदेवं देवो।। मा० 19.66।।
   (ज) वाडषव्यानि सुरभीणि कृत्वी।। का० 21.4.16
   (झ) कृत्वी करदेवं देवो वनस्पति.....।।

   मै० 4.13.7; काठ० 18.21
2. खात्वी।।
   (क) तया ज्योतिरजस्त्रमिदग्निं खात्वी।। तै० 4.1.1.4
3. गत्वी।।
   (क) सा नो दुहीयद्यवसेव।। ऋ० 4.41.5; 10.101.9
4. गूढ्वी।।
   (क) गूढ्वी तमो ज्योतिषोषा अबोधि।। ऋ० 7.80.2
5. जनित्वी।।
   (क) यज्ञं जनित्वी तन्वी3निमामृजु।। ऋ० 10.65.7
6. जुष्ट्वी।।
   (क) जुष्ट्वी नरा दुहिता सूर्यस्य।। ऋ० 1.118.5
   (ख) जुष्ट्वी दशस्य सोमिनः सखायम्।। ऋ० 8.62.6
   (ग) जुष्ट्वी न इन्द्रो सुपथा सुगान्युरौ।। ऋ० 9.97.16
7. विष्ट्वी।।
   (क) विष्ट्वी शमी तरणित्वेन वाघतो।। ऋ० 1.110.4
   (ख) विष्ट्वी शमीभिः सुकृतः सुकृत्यया।। ऋ० 3.60.3

(ग) विष्ट्वी ग्रावाणः सुकृतः सुकृत्यया।। ऋ० 1.52.6

8. वृत्वी।।

(क) अपो वृत्वी रजसो बुध्नमाशयत्।। ऋ० 1.52.6

9. वृक्त्वी।।

(क) क्रव्यादो वृक्त्व्यपि धत्स्वासन्।। ऋ० 10.87.2

10. वृष्ट्वी।।

(क) वृष्ट्वी शं योराप उस्रि भेषजं।। ऋ० 5.53.14

11. स्नात्वी।।

(क) स्विन्नः स्नात्वी मलादिव।। ऋ० 3.12.10; काठ० 38.5

12. हत्वी।।

(क) वज्रेण हत्व्यवृणक्तुविष्वाणिः।। ऋ० 2.17.6

(ख) हत्वी दस्यून्पुर आयसीर्नि तारित्।। ऋ० 2.20.8

(ग) ज्योगभूवन्ननुधूपितासो हत्वी।। ऋ० 2.30.10

(घ) हत्वी दस्यूप्रार्यं वर्णमावत्।।

ऋ० 3.34.9; शौ० 20.11.9

13. हित्वी।।

(क) हित्वी शिरो जिह्वया वावदच्चरत्।।

ऋ० 6.56.6; मा० 33.96

(ख) हित्वी वव्रिं हरितो वृष्टिमच्छ।। ऋ० 9.69.9

(ग) हित्वी गयमारे अवद्य आगात्।। ऋ० 10.99.5

14. पूत्वी।।

(क) अपालामिन्द्र त्रिष्पूत्व्यकृणोः सूर्यत्वचम्।।

ऋ० 8.91.7; पै० 4.26.7

15. भूत्वी।।

(क) वयो ये भूत्वी पतयन्ति नक्तभिः।। ऋ० 7.104.1

(ख) उभे सहस्वती भूत्वी सपत्नी मे सहावहै।। ऋ० 10.145.5

16. पीत्वी।।

(क) पीत्वी सोमस्य वावृधे।। ऋ० 3.40.7; शौ० 20.6.7

(ख) पीत्वी शिप्रे अवेपयः।।

ऋ० 8.76.10; मा० 8.69; का० 8.14; शौ० 20.42.3

अन्य भी अनेक प्रयोग हैं, ये हमने कतिपय ही उद्धृत किये हैं।।

197. आज्जसेरसुक्।। अष्टा० 7.1.50

का०- अवर्णान्तादङ्गादुत्तरस्य जसेरसुगागमो भवति छन्दसि विषये। ब्राह्मणासः पितरः सोम्यासः (ऋ० 6.75.10)। ब्राह्मणाः सोम्या इति प्राप्ते। ये पूर्वासो य उपरासः (ऋ० 10.15.2) इत्यत्र परत्वादसुकि पुनः प्रसङ्गविज्ञानात् (परि० 39) शीभावः प्राप्तः, 'सकृद्गतौ विप्रतिषेधे यद् बाधितं तद् बाधितमेव' (परि० 40) इति न भवति।।

सि०- अवर्णादङ्गात्परस्य जसोऽसुक् स्यात्। देवासः (ऋ० 1.36.4)। ब्राह्मणासः (ऋ० 6.75.10)।।

प्रस्तुत सूत्र में **'छन्दसि'** तथा **अङ्गस्य'** की अनुवृत्ति पूर्ववत् आ रही है। वेदविषय में अवर्णान्त अङ्ग से उत्तर जस् को असुक् आगम होता है। **देवासः। ब्राह्मणासः। सोम्यासः।** देव + अस्, प्रस्तुत सूत्र से असुक् आगम देव + अस् + अस् = **'अकः सवर्णे दीर्घः** (अष्टा० 6.1.101) से दीर्घ देवासः बना। इसी प्रकार **ब्राह्मणासः, सोम्यासः** आदि बने। लोक में **ब्राह्मणाः सोम्याः देवाः** रूप बनेंगे। **'ये पूर्वासः य उपरासः'**-यहाँ पर परवर्ती होने से जस् के शी आदेश से पहले इस सूत्र से असुक् का आगम कर देने पर पुनः प्रसङ्गवश जस् का शी आदेश प्राप्त है किन्तु **'सकृद्गतौ विप्रतिषेधे यद् बाधितं तद् बाधितमेव'** अर्थात् सकृदगति में विप्रतिषेध में जिसका एक बार बाध हो गया है, उसका हो ही गया-इस न्याय से जस् का शी नहीं होता है। वैदिक विधियाँ बहुल रूप से हो जाती हैं, अतः वैकल्पिक हैं, इसी कारण असुक् के बिना भी रूप मिलते हैं। आचार्य ने जस् प्रत्यय माना है, उसी को प्राचीन आचार्य **'जसि'** मानते हैं उसी का **'जसेः'** रूप प्रस्तुत सूत्र में है।

वेदों में प्रस्तुत सूत्र के अनेक प्रयोग होने से हम कतिपय उद्धृत कर रहे हैं-

1. देवासः।।

(क) देवासस्त्वा वरुणो मित्रो अर्यमा।। ऋ० 1.36.4

(ख) देवासो रण्वमवसे।। ऋ० 1.128.8

(ग) विश्वे देवासः सुहवास ऊमाः।। ऋ० 4.19.1

(घ) देवासो दूतमक्रत।। ऋ० 5.21.3

(ङ) देवासश्च मर्तासश्च।। ऋ० 8.15.8

(च) विश्वे देवास इह मादयान्ताम्।।

मा० 2.13; का० 2.3.12

(छ) गवि देवासो घृतमन्वविन्दन्।।

मा० 17.92; का० 19.1.6

(ज) यद्देवासो ललामगुम्।। मा०-23.29

(झ) विश्वे देवासो अदितिः सजोषाः।। तै० 3.3.11.3

(ञ) तं देवासः प्रति गृभ्णत्यश्वम्।। तै० 4.6.9.2

(ट) विश्वे देवासो असिधा।। मै० 4.10.3

(ठ) विश्वे देवासः परमे।। मै० 4.12.4

(ड) विश्वे देवासो अदिति सजोषाः।। मै० 4.12.6

(ढ) भूर्णिं देवास इह सुश्रियं दधुः।। काठ० 7.12

(ण) तं गूर्धया स्वर्णरं देवासो।। कौ० 1.109; 2.16.87

(त) त्रिकदुकेषु चेतनं देवासो यज्ञमत्नत।। कौ० 2.724

(थ) यं देवास इति द्विता।। कौ० 2.12.45

(द) स्वाना देवास इन्दवः।। कौ० 2.19.92

(ध) इति देवासो अब्रुवन्।। जै० 3.20.7

(न) देवासश् च मर्तासश् च।। जै० 4.16.2

(प) देवासो विश्वधायसः।। शौ० 3.22.2

(फ) देवासो यज्ञमिमं जुषन्ताम्।। शौ० 7.29.1

(ब) देवासो यज्ञमत्नत।। शौ० 20.110.3
(भ) इति देवासो अब्रुवन्।। शौ० 20.137.5
(म) विश्वे देवास इहमादयध्वम्।। पै० 5.4.9
(य) विश्वे देवासो अदुहः।। पै० 6.17.3

2. ब्राह्मणास।। 3. सोम्यासः।।
(क) ब्राह्मणासः पितरः सोम्यासः।।
ऋ० 6.75.10; मै० 3.16.3; काठ० 46.1; पै० 15.10.10

3. जनासः।।
(क) यस्मान्न ऋते विजयन्ते जनासो।। ऋ० 2.12.9

नोट- 'स जनास इन्द्रः' यह मन्त्रांश ऋग्वेद के द्वितीय मण्डल के बारहवें सूक्त के प्रथम (1.14) चौदह मन्त्रों में उपलब्ध है। यह सम्बोधन रूप है।

(ख) विश्वे जनासो अश्विना हवन्ते।। ऋ० 3.58.4
(ग) अनीकमस्य न मिनज्जनासः।। ऋ० 5.2.1
(घ) सुतावन्तो वायुं द्युम्ना जनासः।। ऋ० 8.26.22
(ङ) यं त्वा जनासो अभि संचरन्ति।। ऋ० 10.4.2
(च) मुह्यन्त्वन्ये अभितो जनास।। मै० 2.10.2
(छ) मुह्यन्त्वन्ये अभितो जनास।। काठ० 21.13
(ज) यं जनासो हविष्मन्तो।। कौ० 2.15.65
(झ) यं जनासो हविष्मन्तो।। जै० 4.15.8
(ञ) तव व्रते नि विशन्ते जनासः।। शौ० 4.25.3
(ट) त्वा वो चन्नराधसं जनासः।। शौ० 5.11.7
(ठ) यस्मान्न ऋते विजयन्ते जनासो।। शौ० 20.34.9
(ड) द्यौस् स ते वें व राञ् जनासः।। पै० 5.6.4

4. पूर्वासः।।
(क) ते नः पूर्वास उपरास इन्दवो।। ऋ० 9.77.3
(ख) ये पूर्वासो य उपरास ईयुः।।

ऋ० 10.15.2; तै० 2.6.12.4; शौ० 18.1.46; मै० 4.10.6

(ग) ये पूर्वासो येऽपरास परेयुः।। पै० 2.30.3

5. प्रियासः।।

(क) सप्त प्रियासोऽजनयन्त वृष्णे।। ऋ० 4.1.123

(ख) अस्य प्रियासः सख्ये स्याम।। ऋ० 4.17.9

(ग) प्रियासः सन्तु सूरयः।।

ऋ० 7.16.7; मा० 33.14; का० 32.1.14

(घ) तव प्रियासो अर्यमन्गृणन्तः।। ऋ० 7.60.1

(ङ) तव प्रियासः सूरिषु स्याम।। तै० 1.6.12.6

(च) ते स्याम वरुणः प्रियासः।। मै० 4.14.3

(छ) ते स्याम वरुण प्रियासः।। काठ० 23.12

(ज) प्रियासः सन्तु सूरयः।। कौ० 1.38

(झ) अस्य प्रियासः सख्ये स्याम।। जै० 4.11.2

(ञ) वयं त इन्द्र विश्वह प्रियासः।। शौ० 20.34.18

(ट) तव प्रियासः सूरिषु स्याम्।। शौ० 20.37.7

7. समुद्रासः।।

(क) समुद्रासो न सवनानि विव्यचुः।। ऋ० 9.80.1

8. सुवीरासः।।

(क) सुवीरासो विदथमा वदेम।। ऋ० 1.117.25

(ख) सुवीरासो अभिमातिषाहः।। ऋ० 2.4.9

(ग) सुवीरासः शोशुचन्त द्युमन्तः।। ऋ० 7.1.4

(घ) सुवीरासो वयं धना।। ऋ० 9.61.23

(ङ) सुवीरासो अदाभ्यम्।। तै० 1.5.5.4

(च) सुवीरासो अदाभ्यम्।। मै० 1.5.2

(छ) सुवीरासो अदाभ्यमग्ने।। काठ० 6.9

(ज) सुवीरासो वयं धना।। जै० 3.44.8

(झ) सुवीरासो विदथमा वदेम।। शौ० 20.34.8

(ञ) सुवीरासो विदथमा वदेम।। शौ० 20.34.18

(ट) सुवीरासो विदथम् आ वदेम।। पै० 17.32.2

9. स्तुतासः।।

(क) स्तुतासो नो मरुतो मृडयन्तु।। ऋ० 1.171.3

(ख) विश्वे स्तुतासो भूता यजत्रा।। ऋ० 6.50.15

(ग) उत स्तुतासो मरुतो व्यन्तु।। ऋ० 7.57.6

10. जीवासः।।

(क) जीवासो विदथमा वदेम।।

शौ० 12.3.30; पै० 17.32.10

11. अजरासः।।

(क) अजरासस्ते सख्ये स्याम।। ऋ० 7.54.2

(ख) अस्याजरासो दमामरित्रा।।

ऋ० 10.46.7; मा० 33.1; का० 32.1.1

(ग) प्रति त्ये ते अजरासस्तपिष्ठाः।। शौ० 8.3.19

12. अश्वासः।।

(क) आ वामश्वासः शुचयः पयस्पा।। ऋ० 1.181.2

(ख) यस्याश्वासः प्रदिशि यस्य गावो।।

ऋ० 2.12.7; शौ० 20.34.7

(ग) अग्ने युक्ष्वा हि ये तवाश्वासो देव साधवः।।

ऋ० 6.16.43; मा० 13.36; काठ० 22.5; कौ० 1.25;

कौ० 2.13.83; तै० 4.5.9.6

(घ) अश्वासो ये वामुप।। ऋ० 7.74.4

(ङ) यस्मिन्नश्वास ऋषभास उक्षणो।।

ऋ० 10.61.14; मा० 20.78; का० 22.7.12

(च) **यस्मिन्नश्वास ऋषभास उक्षणो।।** मै० 3.11.4

13. **उभयास:।।**

(क) **उभयासो जातवेदः स्याम।।** ऋ० 2.2.12

(ख) **त्वां राय उभयासो जनानाम्।।**

ऋ० 6.1.5; मै० 4.13.6; काठ० 18.20

(ग) **रातौ स्यामोभयास आ ते।।** ऋ० 7.1.25

एवं वेदों में **'देवास:'** के उनतीस, **'ब्राह्मणास:'** के छः, **'जनास:'** के पच्चीस, **'पूर्वास:'** के आठ, **'प्रियास:'** के तेरह, **'समुद्रास:'** का एक, **'सुवीरास:'** के ग्यारह, **'स्तुतास:'** के तीन, **'जीवास:'** के दो, **'अजरास:'** के पाँच, **'अश्वास:'** के चौदह तथा **'उभयास:'** के पाँच प्रयोग स्थल मिले हैं। अन्य भी अनेक प्रयोग हैं।।

198. श्रीग्रामण्योश्छन्दसि।। अष्टा० 7.1.56

का०- **श्री ग्रामणी इत्येतयोश्छन्दसि विषय आमो नुडागमो भवति। श्रीणामुदारो धरूणो रयीणाम् (ऋ० 10.45.5)। अपि तत्र सूतग्रामणीनाम् (काठ० सं० 28.3)। श्रीशब्दस्य 'वामि' (1.4.5) इति विकल्पेन नदीसंज्ञा, तत्र नित्यार्थं वचनम्। सूतग्रामणी- नामिति यदा सूताश्च ते ग्रामण्यश्च सूतग्रामण्यो भवन्ति तदर्थमिदं वचनम्। यदा तु सूतश्च ग्रामणीश्च सूतग्रामणि, सूतग्रामणि च सूतग्रामणि च सूतग्रामणि चेति सूतग्रामणीनामिति, तदा ह्रस्वादित्येव सिद्धम्।।**

सि०- **आमो नुट्। श्रीणामुदारो धरुणो रयीणाम् (ऋ० 10.45.5)। अपि सूत्रग्रामणीनाम्।।**

प्रस्तुत सूत्र में **'ह्रस्वनद्यापो नुट्'** (अष्टा० 7.1.54) से **'नुट'** की, **'आमि सर्वनाम्नः सुट'** (अष्टा० 7.1.52) से **'आमि'** की तथा पूर्ववत् **'अङ्गस्य'** की अनुवृत्ति आ रही है। वेद विषय में श्री तथा ग्रामणी अङ्ग के आम् को नुट् का आगम होता है। उदा०- **श्रीणामुदारो धरुणो रयीणाम्-** श्री शब्द की **'वामि'** (अष्टा० 1.4.5) से विकल्प से नदी -संज्ञा प्राप्त है।

उसमें नित्य नुट् करने के लिये श्री शब्द का ग्रहण है। **अपि तत्र सूतग्रामणीनाम्।** **'सूताश्च ग्रामण्यश्च' – सूतग्रामण्यः तेषां सूतग्रामणीनाम्**– इसमें इतरेतरद्वन्द्व है। इतरेतरद्वन्द्व में ह्रस्व न होने से पूर्ववत् नुट् की प्राप्ति नहीं थी, इसलिये यह सूत्र पढ़ा गया है।

वेदसंहिताओं में प्रस्तुत सूत्र के प्रयोग मिलते हैं–

1. **श्रीणाम्।।**

   (क) **श्रीणामुदारो।।**

   ऋ० 10.45.5; मा० 12.22; का० 13.2.5; तै० 4.2.2. 1; मै० 2.7.9; 4.11.2; काठ० 2.15

2. **सूतग्रामणीनाम्।।**

   (क) **तत्र सूतग्रामणीनां गायत्र्या वै।।** काठ० 28.3

वेद संहिताओं में **'श्रीणाम्'** पद की सात स्थलों पर पुनरावृत्ति ही हुई है, **'सूतग्रामणीनाम्'** मात्र एक स्थल पर ही प्रयुक्त हुआ है।।

199. गोः पादान्ते।। अष्टा० 7.1.57

का०– गो इत्येतस्मादृक्पादान्ते वर्तमानादुत्तरस्यामो नुडागमो भवति। विद्मा हि त्वा गोपतिं शूर गोनाम् (ऋ० 10.47.1)। पादान्त इति किम्? गवां गोत्रमुदसृजो यदङ्गिरः (ऋ० 2.23.18)। 'सर्वे विधयश्छन्दसि विकल्प्यन्ते' (परि० 35) इति पादान्तेऽपि क्वचिद् न भवति। हन्तारं शत्रूणां कृधि विराजं गोपतिं गवाम् (ऋ० 10.166.1)।।

सि०– विद्मा हि त्वा गोपतिं शूर गोनाम् (ऋ० 10.47.1)।। पादान्ते किम्? गवां शता पृक्षयामेषु। पादान्तेऽपि क्वचिन्न। छन्दसि सर्वेषां वैकल्पिकत्वात्। विराजं गोपतिं गवाम्।।

प्रस्तुत सूत्र में **'श्रीग्रामण्योश्छन्दसि'** (अष्टा० 7.1.56) से **'छन्दसि'** की तथा पूर्ववत् नुट्, आमि, अङ्गस्य की अनुवृत्ति आ रही है। ऋचा के पाद के अन्त में वर्त्तमान गो शब्द से उत्तर आम् को नुट् आगम वेद-विषय में होता है। विद्मा हि त्वा गोपतिं शूर गोनाम्। गो + नुट् + आम् = **गोनाम्।** यह ऋचा के अन्त में प्रयुक्त हुआ है। पादान्त के अन्त में-इसका क्या फल है? **गवां**

गोत्रमुदसृजो यदङ्गिरः। गवां शता पृक्षयामेषु। यहाँ पाद के आदि में नुट् नहीं होता है। 'सभी विधियाँ वेद में विकल्प से होती हैं-इसके अनुसार कहीं-कहीं पाद के अन्त में भी नहीं होता है- '**हन्तारं शत्रूणां कृधि विराजं गोपतिं गवाम्**'। यहाँ अन्त में होने पर भी नुडागम नहीं हुआ।

प्रस्तुत सूत्र के अनुसार वेद संहिताओं में जो प्रयोग मिले हैं, वे निम्न हैं-

1. **गोनाम्।।**

(क) **अस्माँ अर्धं कृणुतादिन्द्र गोनाम्।।** ऋ० 230.5

(ख) **उत व्रजमपवर्तासि गोनाम्।।** ऋ० 4.20.8

(ग) **तेन पासि गुह्यं नाम गोनाम्।।** ऋ० 5.3.3

(घ) **उर्वान्दयन्त गोनाम्।।** ऋ० 7.16.7

(ङ) **ददत्सहस्रा दश गोनाम्।।** ऋ० 8.5.37

(च) **कक्षीवते शतहिमाय गोनाम्।।** ऋ० 9.74.8

(छ) **गोपतिं शूर गोनाम्।।** ऋ० 10.47.1।।

(ज) **वि भजन्त गोनाम्।।** ऋ० 10.108.8

(झ) **उर्वान् दयन्त गोनाम्।।** मा० 33.14; का० 32.2.14

(ञ) **गोपतिंशूर गोनाम्।।** मै० 4.14.5

(ट) **वामदेवो वा एतदङ्गोनामपश्यत्।।** काठ० 32.2

(ठ) **उर्वं दयन्त गोनाम्।।** कौ० 1.38

(ड) **विद्मा हि त्वा गोपतिं शूर गोनाम्।।** कौ० 1.317

(ढ) **पवमान पवसे धाम गोनाम्।।** कौ० 1'534

(ण) **अपीच्यांऽगुह्यं नाम गोनाम्।।** कौ० 2.679

(त) **ते मन्वत प्रथमं नाम गोनां।।** जै० 2.1.7

(थ) **सहस्रा दश गोनाम्।।** शौ० 20.127.3

एवं '**गोनाम्**' पद के संहिताओं में अट्ठारह प्रयोग प्राप्त हुए हैं।।

200. छन्दस्यपि दृश्यते।। अष्टा० 7.1.76

का०-अस्थिदधिसक्थ्यक्षणामनङ् छन्दस्यपि दृश्यते। यत्र

विहितस्ततोऽ- न्यत्रापि दृश्यते। अचीत्युत्तफमनजादावपि दृश्यते। इन्द्रो दधीचो अस्थभिः (ऋ० 1.84.13)। भद्रं पश्येमाक्षभिः (मा० सं० 25.21)। तृतीयादिष्वित्युत्तफमतृतीयादिष्वपि दृश्यते। अस्थान्युत्कृत्य जुहोति। विभत्तफावित्युत्तफमविभत्तफा- वपि दृश्यते। अक्षण्वता लाङ्गलेन। अस्थन्वन्तं यदनस्था बिभर्ति (ऋ० 1.164.4)।।

सि०- अस्थ्यादीनामनङ्। इन्द्रो दधीचो अस्थभिः (ऋ० 1.84.13)

प्रस्तुत सूत्र में **'अस्थिदधिसक्थ्यक्ष्णामनङ्ङुदात्तः'** (अष्या० 7.1.75) की, **'नपुंसकस्य झलचः'** (अष्या० 7.1.72) से **'नपुंसकस्य'** की तथा पूर्ववत् **'अङ्गस्य'** की अनुवृत्ति आ रही है। वेद-विषय में अस्थि, दधि, सक्थि, अक्षि-इन नपुंसकलिङ्ग वाले अङ्गों को भी अनङ् देखा जाता है। अर्थात् जहाँ विधान है, वहाँ से अन्यत्र भी दिखायी देता है। जैसे **'अस्थिदधिसक्थ्यक्ष्णा- मनङ्ङुदात्तः'** (अष्या० 7.1.75) इस पूर्व सूत्र में अजादि परे कहा है, अतृतीयादि में भी दृष्टिगत होता है यथा-**अस्थामि**। तथा 'विभक्तौ' कहा है अविभक्ति परे भी मिलता है- **अक्षण्वता**। अर्थात् **'अस्थिदधिसक्थ्यक्ष्णामनुङ्ङुदात्तः'** (अष्या० 7.175) के जो नियम हैं उनके विपरीत भी **'अनङ्'** मिला है।

प्रस्तुत सूत्र के वेदसंहिताओं में निम्न प्रयोग मिलते हैं-

'अस्थि' को अनङ् (आदेश होकर)।। अतृतीयादि विभक्ति परे रहते -

1. **अस्थानि।।**
   (क) **शर्म च मे वर्म च मेऽङ्गानि च मे ऽस्थानिच...।।**
   तै० 4.7.1.2
   (ख) **प्रामेषतास्थानि शातया इति०।।** तै० 6.2.8.5
   (ग) **केशा नक्षत्राणि रूपं तारका अस्थानि नमो...।**
   तै० 7.5.25.1
   (घ) **आग्नेयानि वै पुरुषस्यास्थानि।।** मै० 2.5.2
   (ङ) **यानि वा अऽदोऽग्निरस्थान्यधूनुतस पूतुदुरभवद्।।**
   मै० 3.8.5

(च) ते वै स्वर्यन्तोऽस्थानि शरीराण्यधून्वत।। मै० 3.9.6

(छ) वारुणमस्थान्याग्ने यानि माँसानि....।। काठ० 13.2

(1) अस्थन्वन्तम्।।

(क) को ददर्श प्रथमं जायमानमस्थन्वन्तं यदनस्था बिभर्ति। भूम्या असुर सृगात्मा क्व स्वित्को विद्वांसमुप गात्प्रष्टुमेतत्।।

ऋ० 1.164.4; शौ० 9.14.4

(ख) अथो अस्थन्वन्तमेवैनं कृत्वा प्रतिष्ठापयति।। मै० 2.3.1

(2) अस्थन्वन्तः।।

(क) तेन प्रीणाति सोऽमन्यतास्थन्वन्तो मे पूर्वे भ्रातरः.....।।

तै० 9.2.8.5

(ख) तस्मादनस्थकाद्रेतसोऽस्थन्वन्तो गर्भाः प्रजायन्ते....।।

काठ० 24.5

(3) अस्थभिः।।

(क) इन्द्रो दधीचो अस्थभिर्वृत्राण्यप्रतिष्कुतः।।

ऋ० 1.48.13; शौ० 20.41.2

(ख) तदृषिरभ्यनूवाचेन्द्रो दधीचो अस्थभिरिति...।।

तै० 5.6.6.3

(ग) ओजो ग्रीवाभि निर्दतिमस्थभिरिन्द्रं स्वपसा।।

तै० 5.718.1

(घ) इन्द्रो दधीचो अस्थभिर्वृत्राण्यप्रतिष्कुतः।।

मै० 2.13.6; काठ० 39.12

(ङ) आजो ग्रीवाभि निर्ऋतिमस्थभिरिन्द्राँ स्वपसा।।

काठ० 53.8

(च) इन्द्रो दधीचो अस्थभिर्वृत्राण्यप्रतिष्कुतः।।

कौ० 1.179; 2.913; जै० 1.19.5

(4) अस्थभ्यः।।

(क) शमस्थभ्यो मज्जभ्यः शम्वस्तु तन्वै तव।।

मा० 23.44; का० 25.8.6

(ख) अस्थभ्यः स्वाहाऽस्थभ्यः स्वाहा।

मा० 39.10; का० 39.8.1

(5) अक्षाणि।।

(क) तेषां सं हन्मो अक्षाणि यथेदं हर्म्यं तथा।।

7.55.6; पै० 4.6.5

(6) अक्षण्वन्तः।।

(क) अक्षण्वन्तः कर्णवन्तः सखायो।। ऋ० 10.71.7

(7) अक्षण्वते।।

(क) अक्षण्वते स्वाहा। तै० 7.5.12.1; काठ० 45.3

(8) अक्षभिः।।

(क) भद्रं पश्येमाक्षभिर्यजत्राः।।

ऋ० 1.89.8; कौ० 2.18.74 मा० 25.21; का० 27.11.8; मै० 4.14.2

(ख) शतं चक्षाणो अक्षभिः।। ऋ० 1.128.3; काठ० 39.16

(ग) क्रत्वा शुक्रेभिरक्षभि।। ऋ० 9.102.8

(घ) तस्मै सहस्त्रमक्षभिविः।। ऋ० 10.79.5

(ङ) पुरुषा देव्यक्षभिः।। ऋ० 10.79.5

(च) शतं चक्षाणो अक्षभिः।। काठ० 39.16

(9) सक्थानि।।

(क) वि सक्थानि नरो यमुः।। ऋ० 5.61.3

(ख) सक्थान्युत्कर्तमपचत।। काठ० 10.6

(10) दधन्वतः।।

(क) अच्छिद्रस्य दधन्वतः सुपूर्णस्य दधन्वतः।।

ऋ० 6.48.18

201. ई च द्विवचने।। अष्टा० 7.1.77

का०- द्विवचने परतश्छन्दसि विषयेऽस्थ्यादीनामीकारादेशो भवति, स चोदात्तः। अक्षी ते इन्द्र पिङ्गले कपेरिव। अक्षीभ्या ते नासिकाभ्याम् (ऋ० 10.163.1)। अक्षी इत्यत्र नुम् परत्वादीकारेण बाध्यते। तत्र कृते 'सकृद्गतौ विप्रतिषेधे यद् बाधितं तद् बाधितमेव' (परि० 40)इति पुनर्नुम् न क्रियते।।

सि०- अस्थ्यादीनामित्येव। अक्षीभ्यां ते नासिकाभ्याम् (ऋ० 10.163.1)।।

प्रस्तुत सूत्र में 'छन्दस्यपि दृश्यते' (अष्टा० 7.1.76) से 'छन्दसि' की तथा पूर्ववत् 'अस्थिदधिसक्थ्यक्ष्णाम् उदात्तः' 'नपुंसकस्य' 'अङ्गस्य' की अनुवृत्ति आ रही है। वेदविषय में द्विवचन विभक्ति परे रहते अस्थि, दधि, सक्थि, अक्षि शब्दों को ईकारादेश होता है। और वह उदात्त होता है। उदा०- अक्षी ते पिङ्गले कपेरिव। अक्षीभ्यां ते नासिकाभ्याम्। इसमें परवर्ती होने के कारण ईत्व आदेश द्वारा नुम का बाध कर लिया जाता है और ऐसा होने पर विप्रतिषेध में एक बार बाध हो जाने पर बाध ही रहता है, पुनः प्रवृत्ति नहीं होती हैं- इस नियमानुसार पुनः नुम् नहीं किया जाता।

वेदसंहिताओं में प्रस्तुत सूत्र के निम्न प्रयोग प्राप्त होते हैं-

1. अक्षि अक्षी।।
   (क) अक्षि श्रियं नि दधुश्चारुमस्मिन्।। ऋ० 1.72.10
   (ख) अक्षी इत चक्षुषा यातमर्वाक्।। ऋ० 2.39.5
   (ग) अक्षी कामेन शुष्यताम्।। पै० 6.6.2
   (घ) याव् अस्याक्षी तौ सूर्याचन्द्रमसौ।। पै० 17.29.2

2. अक्षीभ्याम्।।
   (क) अक्षीभ्यां ते नासिकाभ्याम्।।
   ऋ० 10.163.1; शौ० 2.33.1; 20.66.17
   (ख) अक्षीभ्याँ स्वाहा।। तै० 7.3.16.1

(ग) तौ सिँहा अभवतां यदक्षीभ्याम्।। काठ० 12.10

(घ) सूर्याचन्द्रमसाभ्यामक्षीभ्याम्।। शौ० 11.4.3

(ङ) यैनम् अक्षीभ्यां प्रा शी।। पै० 16.553

(च) ततश् चैनम् अन्याभ्याम् अक्षीभ्याम्।। पै० 16.56.3

वेदों में 'अक्षी' और 'अक्षीभ्याम्' के ग्यारह प्रयोग प्राप्त होते हैं, अन्य पदों के उदाहरण नहीं मिले हैं।।

202. दृक्स्ववस्स्वतवसां छन्दसि।। अष्टा० 7.1.83

का०- दृक् स्ववस् स्वतवस् इत्येतेषां सौ परतो नुमागमो भवति छन्दसि विषये। ईदृङ्। तादृङ्। यादृङ्। सदृङ् (ऋ० 1.94.7)। स्ववान् (ऋ० 10.92.9)। स्वतवाँः पायुरग्ने (ऋ० 4.2.6)।।

सि०- एषां नुम् स्यात्सौ। कीदृङ्ङिन्द्रः (ऋ० 10.108.3)। स्ववान् (ऋ० 1.35.10)। स्वतवान् (ऋ० 4.2.6)।।

प्रस्तुत सूत्र में **'सावनडुहः'** (अष्या० 7.1.8.2) से **'सौ'** की तथा पूर्ववत् नुम्, अङ्गस्य की अनुवृत्ति आ रही है। वेदविषय में दृक्, स्ववस्, स्वतवस् इन अङ्गों को सु परे रहते नुम् आगम होता है। उदा०- ईदृङ्, ईदृश् में क्विन् करने के बाद सु परे नुम्, हल्ङ्यादिलोप होकर संयोगान्तलोप, **'क्विन् प्रत्ययस्य कुः'** (अष्या० 8.2.62) से न् का कुत्व करने पर ङ् बना। तादृङ्, यादृङ्, सदृङ् में भी इसी प्रकार हुआ। स्ववान्। स्वव नुम् स् सु = स्ववन्स् स् हल्ङ्यादि लोप, संयोगादिलोप, **'सान्तमहतः संयोगस्य'** (अष्या० 6.4.10) से दीर्घ होकर स्ववान्। स्वतवान्। बनेगें। संहितापाठ में **'स्वतवाँ पायुः'** के नकार को रु **'स्वतवान्पायौ'** (अष्या० 8.3.11) से बनकर विसर्ग होगा। **'अत्रानुनासिकः पूर्वस्य तु वा'** (अष्या० 8.3.2) से पूर्व को अनुनासिक आदेश होकर सिद्ध होगा।

वेदों में प्रस्तुत सूत्र के प्रयोग निम्न हैं-

1. ईदृङ्।।

(क) ईदृङ् चान्यादृङ् च।।

मा० 17.81; का० 18.7.2; तै० 4.6.5.5

(ख) ईदृङ् चान्यादृङ् चैतादृङ् च।।

तै० 1.8.13.2; काठ० 18.6

(ग) अबिभेदीदृङ् वै राष्ट्रं विपर्यावर्तयतीति।। तै० 2.5.11

(घ) ईदृङ् चैतादृङ् च।। मै० 2.11.1

2. एतादृङ्।।

(क) एतादृङ् च प्रतिदृङ्। तै० 1.8.13.2; 4.6.5.5

(ख) ईदृङ् चैतादृङ् च प्रतिदृङ् च।। मै० 2.11.1

3. कीदृङ्।।

(क) कीदृङ्ङिन्द्रः सरमे का।। ऋ० 1.108.3

4. तादृङ्।।

(क) तादृङ् पुनर्भवति यादृक् सन्यजते।।

(ख) यस्य तादृङ्ङृषभो भवति...स्य तादृङ्ङृषभो भवति...।।

मै० 4.2.14

5. यादृङ्।।

(क) ततः पापीयान् भवति यादृङ् सन् यजते।। काठ० 30.3

6. सदृङ्।।

(क) यो विश्वतः सुप्रतीकः सदृङ्ङसि।। ऋ० 1.94.7

(ख) पुरुत्रा हि सदृङ्ङसि।। ऋ० 8.11.8; कौ० 2.11.67

(ग) सदृङ् च प्रतिसदृङ् च।। मा० 17.81; का० 18.7.2

(घ) इन्द्रो वै सदृङ् देवताभिरासीत्....।।

तै० 2.2.8.5; 7.2.5.2; 7.3.6.1

(ङ) यदि नावविध्यति सदृङ्।। तै० 2.5.5.6

(च) भ्रातृव्येण सदृङ्ङसीत्यहंवेदा।। मै० 1.4.12

(छ) सदृङ् च प्रतिसदृङ् च।। मै० 2.11.1

(ज) य एनेन सदृङ् प्रभूरसि ..।। काठ० 7.6

(झ) यदि मन्येत सदृङ् मयेति।। काठ० 20.6

(ञ) यो विश्वतस् सुपतीकस् सदृङ्ङ्।। पै० 12.1.7

7. स्ववान्।।

(क) सुमृळीकः स्ववाँ यात्वर्वाङ्।।

ऋ० 1.35.10; मा० 34.26; का० 33.1.20

(ख) सुकृत्सुपाणिः स्ववां ऋतावा।। ऋ० 3.54.12

(ग) इन्द्रः सुत्रामा स्ववाँ अवोभिः।।

ऋ० 6.47.12; मा० 20.51; का० 22.5.5

(घ) येभिः शिवः स्ववाँ एवयावभिः।। ऋ० 10.62.6

(ङ) स सुत्रामा स्ववाँ।।

तै० 1.7.13.5; मा० 20.52; का० 22.56;
काठ० 8.16; शौ० 7.66.1; शौ० 20.125.6;
शौ० 20.125.7

8. स्ततवान्।।

(क) भुवस्तस्य स्वतवाँः पायुरग्ने।। ऋ० 4.2.6

(ख) गिरिर्न यः स्वतवाँ ऋष्व।। ऋ० 4.2.6

(ग) स्वतवाँश्च प्रघासी च।। मा० 17.85; का० 18.7.6

वेदों में 'ईदृङ्' के सात, 'एतादृङ्' के तीन, 'कीदृङ्' का एक, 'तादृङ्' के दो, 'यादृङ्' का एक, 'सादृङ्' तथा 'स्ववान्' के पन्द्रह-पन्द्रह, 'स्वतवान्' के चार प्रयोग प्राप्त हुए हैं।।

203. बहुलं छन्दसि।। अष्टा० 7.1.103

का०- छन्दसि विषय ऋकारान्तस्य धातोरङ्गस्य बहुलमुकारादेशो भवति। ओष्ठ्यपूर्वस्येत्युत्तफम्, अनोष्ठ्यपूर्वस्यापि भवति। मित्रावरुणा ततुरिम् (ऋ० 4.39.2)। दूरे ह्यध्वा जगुरिः (ऋ० 10.108.1)। आष्ठ्यपूर्वस्यापि न भवति- पप्रितमम्। वव्रितमम्। क्वचिद् भवतिपपुरिः (ऋ० 1.46.4)।।

सि०- उदोष्ठ्यपूर्वस्य (7.1.102)। बहुलं छन्दसि (7.1.103)। ततुरिः। जगुरिः पराचैः।।

प्रस्तुत सूत्र में 'उदोष्ठ्यपूर्वस्य' (अष्य० 7.1.102) से 'उत्' की 'ऋत

